तक्र ... भोजनमहितं विद्यात् पुनरुष्णीकृतं ॥ रूक्षमतिलवणं तिलपिण्याकं शाकं तथा ॥ वर्जयेद्
कीर्तन प्रीतिवह्निस्त्रीपथसेवनं ॥ प्रातःस्नानोपवासादिकायक्लेशादिकं तथा ॥ गोधूमशालियवषाष्टिकशोभनान्नं क्षीराज्य
खण्डनवनीतसितामधूनि ॥ शुण्ठीपटोलकफलादिकपञ्चशाकं मुद्गादिदिव्यमुदकं च यमीन्द्रपथ्यम् ॥ इष्टं सुमधुरं स्नि
ग्धं गव्यं धातुप्रपोषणम् ॥ मनाभिलषितं योग्यं योगी भोजनमाचरेत् ॥ युवा वृद्धोऽतिवृद्धो वा व्याधितो दुर्बलोऽपि वा ॥
अभ्यासात्सिद्धिमाप्नोति सर्वयोगेष्वतन्द्रितः ॥ पीठानि कुम्भकाश्चित्रा मुद्रादिकरणानि च ॥ सर्वाण्यपि हठाभ्यासे राजयो
योगफलावधि ॥ अथासने दृढे योगी वशी हितमिताशनः ॥ गुरूपदिष्टमार्गेण योगमार्गं समभ्यसेत् ॥ चले वाते चलं
चित्तं निश्चले निश्चलं तथा ॥ योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् ॥ यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ॥
मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् ॥ मलाकुलासु नाडीषु मारुतो नैव मध्यगः ॥ कथं स्यादुन्मनीभावः कार्य
सिद्धिः कथं भवेत् ॥ शुद्धिमेति यदा सर्वं नाडीचक्रं मलाकुलं ॥ तदैव जायते योगी प्राणसंग्रहणे क्षमः ॥ प्राणायामं
सततं कुर्यात्सात्त्विकया धिया ॥ यथा सुखं मवस्थाय मलाः शोषं प्रयान्ति च ॥ बद्धपद्मासने योगी प्राणं चन्द्रेण
पूरयेत् ॥ धारयित्वा यथाशक्त्या भूयः सूर्येण रेचयेत् ॥ प्राणं सूर्येण चाकृष्य पूरयेदुदरं शनैः ॥ विधिवत्कुम्भकं कृत्वा

वंधनं यस्तनायासात्तस्य मेवोपजायते ॥ नवासनं सिद्धसमं न कुंभसदृशोऽनिलं ॥ न खेचरीसमा मुद्रा न नादसदृशो लय ॥ वामोरूपरि द-
क्षिणं च चरणं संस्थाप्य वामं तथा दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढं ॥ अंगुष्ठे हृदये निधाय चिबुकं नासाग्रमालोकये-
त् एतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते ॥ उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः ॥ ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ ॥
नासाग्रे विन्यसेद्राजदंतमूलं च जिह्वया ॥ उत्तंभ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः ॥ इदं पद्मासनं प्रोक्तं सर्वव्याधिविनाशनं ॥ दुर्लभं
येन केनापि धीमता लभ्यते भुवि ॥ कृत्वा संपुटितौ करौ दृढतरं बध्वा तु पद्मासनं गाढं वक्षसि सन्निधाय चिबुकं ध्यायंश्च तच्चेतसि ॥ वारंवा-
रमपानमूर्ध्वमनिलं प्रोत्सारयन्पूरितं मुंचन्प्राणमुपैति बोधमतुलं शक्तिप्रबोधोदयात् ॥ पद्मासने स्थितो योगी नाडीद्वारेण पू-
रयेत् ॥ मारुतं यस्तु विधृतिं स मुक्तो नात्र संशय ॥ गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ॥ दक्षिणे सव्यगुल्फं तु दक्ष-
गुल्फं तु सव्यके ॥ हस्तौ तु जान्वोः संस्थाप्य स्वांगुलीः संप्रसार्य च ॥ व्यात्तवक्त्रो निरीक्षेत नासाग्रं सुसमाहितः ॥ सिंहासनं भवेदेतत्पूजितं
योगिभिः सदा ॥ बंधत्रितयसंधानं कुरुते चासनोत्तमम ॥ गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ॥ पार्श्वपादौ च पाणिभ्यां
दृढं बध्वा सुनिश्चलं ॥ भद्रासनं भवेदेतत्सर्वव्याधिविनाशनं ॥ गोरक्षासनमित्याहुरिदं वै सिद्धयोगिनः ॥ एवमासनबंधेषु यो-
गींद्रो विगतश्रमः ॥ अभ्यसेन्नाडिकाशुद्धिं मुद्रादिपवनक्रियां ॥ क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत् ॥ न शास्त्रपाठमा-
त्रेण योगसिद्धिः प्रजायते ॥ न वेषधारणं सिद्धेः कारणं न च तत्कथा ॥ क्रियैव कारणं सिद्धेः सत्यमेतन्न संशयः ॥ शिश्नोदररता
ये हे तद्वेषधारिणी ॥ मयि बोधाद्बोध्यच्छेत्तछ्रीयं विश्वबुद्बुदः ॥ पानी नउदिमोवेमि विकल्पावसगाः कृताः ॥ आसनं कुंभ

बा॰तं
२७
न संशयः ॥ नाभिदघ्नजले पायुन्यस्तनालोत्कटासनः ॥ आधाराकुंचनं कुर्यात्क्षालनं बस्तिकर्म तत् ॥ गुल्मप्लीहोदरं चापि
वातपित्तकफोद्भवं ॥ बस्तिकर्मप्रभावेन क्षीयंते सकलामयाः ॥ धात्विंद्रियांतःकरणप्रसादं दधाच्च कांतिं दहनप्रदीप्तिं ॥ अ-
शेषदोषोपचयं निहन्यादभ्यस्यमानं जलबस्तिकर्म ॥ सूत्रं वितस्ति सुस्निग्धं नासानाले प्रवेशयेत् ॥ मुखान्निर्गमयेदेषा ने-
तिः सिद्धैर्निगद्यते ॥ कपालशोधिनी चैव दिव्यदृष्टिप्रदायिनी ॥ जत्रूर्ध्वजातरोगौघं नेतिराशु निहंति च ॥ निरीक्षेन्नि-
श्चलदृशा सूक्ष्मलक्ष्यं समाहितः ॥ अश्रुसंपातपर्यंतमाचार्यैस्त्राटकं स्मृतं ॥ मोचनं नेत्ररोगाणां तंद्रादीनां कपाटकं ॥
यत्नतस्त्राटकं गोप्यं यथा हाटकपेटकं ॥ अमंदावर्तवेगेन तुंदं सव्यापसव्यतः ॥ नतांशो भ्रामयेदेषा नौली गोली प्रश-
स्यते ॥ मंदाग्निसंदीपनपाचनादिसंधापिकानंदकरी सदैव ॥ अशेषदोषामयशोषणी च हठक्रियामौलिरियं च नौली ॥
भस्त्रावल्लोहकारस्य रेचपूरौ ससंभ्रमौ ॥ कपालभातिर्विख्याता कफदोषविशोषिणी ॥ षट्कर्मभिर्गतस्थौल्यं
कफमेदोबलाधिकं ॥ प्राणायामं ततः कुर्यादनायासेन सिध्यति ॥ प्राणायामैरेव सर्वे प्रशुष्यंति मला इति ॥ आचा-
र्याणां तु केषांचिदन्यत्कर्म न संमतं ॥ षट्कर्मयोगमाप्नोति पवनाभ्यासतत्परः ॥ ब्रह्मादयोपि त्रिदशाः प्राणायामपरा-
यणाः ॥ तेनाभिसिद्धिं गतास्तेन तस्मात्पवनमभ्यसेत् ॥ सुमना कालकाभयं तस्मात्पवनमभ्यसेत् ॥ यावद्बद्धो मरुद्देहे
यावच्चित्तं निरामयं ॥ यावद्दृष्टिर्भ्रुवोर्मध्ये तावत्कालभयं कुतः ॥ विधिवत्प्राणसंयामैर्नाडीचक्रे विशोधिते ॥ सुषुम्ना-
वदनं भित्वा सुखाद्विशति मारुतः ॥ मारुते मध्यसंचारे मनस्थैर्यं प्रजायते ॥ यो मनःसुस्थिरीभावः सैवावस्था मनोन्मनी ॥ गुरुः
२७

पुनः चंद्रेण रेचयेत् ॥ येन त्यजेत्तेन पीत्वा धारयेदविरोधतः ॥ रेचयेच्च ततोऽन्येन शनैरेव न वेगतः ॥ प्राणंचेदिडया पिबेन्नियमितं भूयोऽ
न्यया रेचयेत्पीत्वा पिंगलया समीरणमथो बध्वा त्यजेद्वामया ॥ सूर्याचंद्रमसोरनेन विधिनाबिंबद्वयं ध्यायतां शुद्धा नाडिग
णा भवंति यमिनां मासत्रयादूर्ध्वतः ॥ प्रातर्मध्यंदिने सायमर्द्धरात्रे च कुंभकान् ॥ शनैरशीतिपर्यंतं चतुर्वारं समभ्यसेत् ॥ अ
धमे जायते स्वेदः कंपो भवति मध्यमे ॥ उत्तिष्ठत्युत्तमे प्राणरोधे पद्मासने मुहुः ॥ जलेन श्रमजातेन गात्रमर्दनमाचरेत् ॥ दृढ
ता लघुता चापि तेन गात्रस्य जायते ॥ अभ्यासकाले प्रथमे शस्तं क्षीराज्यभोजनं ॥ ततोऽभ्यासे स्थिरीभूते न तादृङ्नियमग्रहः ॥ यथा
सिंहो गजो व्याघ्रो भवेद्वश्यः शनैः शनैः ॥ तथैव सेवितो वायुरन्यथा हंति साधकं ॥ प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत् ॥
अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः ॥ हिक्का कासस्तथा श्वासः शिरःकर्णाक्षिवेदना ॥ भवंति विविधा दोषाः पवनस्य व्यतिक्र
मात् ॥ युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं च सेवयेत् ॥ युक्तं युक्तं च बध्नीयादेवं सिद्धिमवाप्नुयात् ॥ यदा नाडिविशुद्धिः स्यात्तदा चिह्ना
नि बाह्यतः ॥ कायस्य कृशता कांतिस्तथा जायते निश्चितं ॥ यथेष्टधारणं वायोरनलस्य प्रदीपनं ॥ नादाभिव्यक्तिरारोग्यं
जायते नाडिशोधने ॥ मेदःश्लेष्माधिकादिनाशार्थं षट्कर्मादि समाचरेत् ॥ अन्यथा नाचरेत्तानि दोषाणां समभावतः ॥ धौती
वस्तिस्तथा नेतिस्त्राटकं नौलिकं तथा ॥ कपालभाथी चैतानि षट्कर्माणि प्रचक्षते ॥ कर्मषट्कमिदं गोप्यं घटशोधनकारकं
विचित्रगुणसंधायि पूज्यते योगपुंगवैः ॥ चतुरंगुलविस्तारं हस्तपंचदशायतं ॥ गुरूपदिष्टमार्गेण सिक्तं वस्त्रं शनैर्ग्रसेत्
ततः प्रत्याहरेच्चैवं बहुदिनैर्धौतीकर्मतत् ॥ श्वासः कासः प्लीहकुष्ठं कफरोगाश्च विंशतिः ॥ धौतीकर्मप्रभावेन नश्यंत्येव

वा॰नं
२८

वारयेत्पवनं स्थली ॥ मुखसंयकप्रयत्नेन घ्राणं घ्राणेन रेचयेत् ॥ यथागलति हृत्कंठे कपालपवनं ततः ॥ वेगेन पूर
येच्चापि हृत्पद्मावधि मारुतं ॥ पुनर्विरेचयेत्तद्वत्पूरयेच्च पुनः पुनः ॥ यथैव लोहकाराणां भस्त्री वेगेन चारयेत् ॥ त
थैव स्वशरीरस्थं चालयेत्पवनं शनैः ॥ यदा श्रमो भवेद्देहे तदा सूर्येण रेचयेत् ॥ अथोदरं भवेत्पूर्णमनिलेन तथा ल
घु ॥ धारयेन्नासिकामध्ये अंगुलीभ्यां तथा दृढं ॥ कुंभकं पूर्ववत्कृत्वा रेचयेदिडयानिलं ॥ वातपित्तश्लेष्महरं शरी
राग्निविवर्द्धनं ॥ कुंडलीबोधकं कुंभो रोगघ्नः सुखदः शुभः ॥ ब्रह्मनाडीमुखसंस्थः कपालार्गलनाशनः ॥ सम्यग्ब
द्धासमुद्भूतो ग्रंथित्रयविभेदकः ॥ वेगाद्घोषं पूरकं भृंगनादं भृंगीनादं रेचकं मंदमंदं ॥ योगींद्राणामेवमभ्यासयो
गाच्चित्ते याता काचिदानंदमूर्छा ॥ पूरकांते तु गाढतरं बद्ध्वा जालंधरं शनैः ॥ रेचयेन्मूर्छनाख्येयं मनोमूर्छा सुखप्रदः ॥
अंतःप्रवर्तिताधारमारुतापूरितोदरः ॥ साक्षात्पयस्यगाधेऽपि प्लवते ब्रह्मपुत्रवत् ॥ प्राणायामस्त्रिधा प्रोक्तो रे
चपूरककुंभकैः ॥ सहितः केवलश्चेति कुंभको द्विविधो मतः ॥ रेचकः पूरकः कार्यः स वै सहितकुंभकः ॥ यावत्केवल
सिद्धिः स्यात्तावत्सहितमभ्यसेत् ॥ रेचकं पूरकं मुक्त्वा सुखाद्वायुनिरोधनात् ॥ प्राणायामोऽयमित्युक्तः स वै केवलकुं
भकः ॥ केवले कुंभके सिद्धे रेचपूरकवर्जिते ॥ न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥ शक्तः केवलकुंभेन यथेष्ट
वायुधारणात् ॥ राजयोगपदं चैव लभते नात्र संशयः ॥ हठं विना राजयोगो राजयोगं विना हठः ॥ न सिध्यति ततो युग्मना
निष्पत्तेः समभ्यसेत् ॥ कुंभकः प्राणरोधांते कुर्याच्चित्तं निरामयं ॥ एवमभ्यासयोगेन राजयोगपदं व्रजेत् ॥ कुंभका

गुरुः
२८

तत्सिद्धयेविधानज्ञोविचित्रान्कुर्वंतिकुंभकान् ॥ विचित्रकुंभकाभ्यासाद्विचित्रासिद्धिमवाप्नुयात् ॥ सूर्यभेदनमुज्जायीतथाशी
त्कालशीतली ॥ भस्त्रीकाभ्रमरीमूर्छाकेवलश्चाष्टकुंभकाः ॥ पूरकान्तेतुकर्तव्योवंधोजालंधराभिधः ॥ कुंभकान्तेरेचकादौकर्त
व्यस्तुड्डियानकः ॥ अधस्तात्कुंचनेनाशुकंठसंकोचनेकृते ॥ मध्येपश्चिमतानेनस्यात्प्राणोब्रह्मनाडिगः ॥ अपानमूर्द्ध्वमुत्
थाप्यप्राणंकंठादधोनयेत् ॥ योगीजराविमुक्तःस्यात्षोडशाब्दवयोभवेत् ॥ अथासनेसुखादेववध्वावध्वासनंततः ॥ दक्ष
णाड्यासमाकृष्यवर्हिस्थंपवनंशनैः ॥ आकेशादानखाग्राच्चनिरोधावधिकुंभयेत् ॥ कृत्वावैवामनाड्याचवालयेत्पवनं
शनैः ॥ कपालशोधनंवाततदोषघ्नंकृमिनाशनं ॥ पुनःपुनरिदंसूर्यभेदनंसमुदाहृतं ॥ मुखंसंयम्यनासाभ्यांआकृष्य
पवनंशनैः ॥ यथालगतिकंठात्तुहृदयावधिसस्वनं ॥ पूर्ववत्कुंभयेत्प्राणंरेचयेदिडयाततः ॥ श्लेष्मादोषहरंदेहवल
दीप्तिविवर्द्धनं ॥ कुंभकुर्यात्सदावक्रप्राणेनैवविजृंभितं ॥ एवमभ्यासयोगेनकामदेवोद्वितीयकं ॥ योगीवक्त्रेःसमा
साघसृष्टिसंहारकारकः ॥ नक्षुधानतृषानिद्रानैवालस्यंतुजायते ॥ भवेत्स्वच्छंददेहश्चसर्वोपद्रववर्जितः ॥ अनेन
विधिनासत्यंयोगीन्द्रोभुविमंडले ॥ रसनातालुमूलेनयःप्राणंसततंपिवेत् ॥ सभवेत्सर्वसिद्धीनांभाजनंनात्रसं
शयः ॥ रसनातालुमूलेनयःप्राणंसततंपिवेत् ॥ अब्दार्द्धेनभवेत्तस्यसर्वगांसुस्थिरःक्रिया ॥ जिह्वायावायुमाकृष्य
पूर्ववत्कुंभसाधनं ॥ प्राणेनपूरणंश्वासाभ्यांरेचयेदनिलंशनैः ॥ गुल्मश्लेष्मादयोदोषाःज्वरपित्तक्षुधातृषा ॥ सतानि
शीतलीनामकुंभकोयंनिहंतिच ॥ ऊर्वोरुपरिसंस्थाप्यउभेपादतलेतथा ॥ पद्मासनंभवेत्तत्सर्वपापप्रणा
शनं ॥ सम्यक्पद्मासनंबध्वासमग्रीवोदरःसुधीः ॥ मुखंसंयम्ययत्नेनप्राणंघ्राणेनरेचयेत् ॥ अथैवस्वशरीरस्थं

वा॰तं
९९

ल्पातनोमुद्रांविसर्जयेत् ॥ नापथ्यंनहिपथ्यंवरसासर्वेपिनीरसा ॥ अपिमुखंविषंघोरंपीयूषमिवजीर्यते ॥ क्षयंकुष्टं
गुदावर्त्तंगुल्माजीर्णपुरोगमाः ॥ दोषसर्वेक्षयंयातिमहामुद्रांतुयोभ्यसेत् ॥ कथितेयंमहामुद्रामहासिद्धिकरीनृणां
गोपनीयाप्रयत्नेननदेयायस्यकस्यचित् ॥ पार्ष्णिभागेनपादस्ययोनिस्थानेनियोजयेत् ॥ वामोरूपरिसंस्थाप्य
दक्षिणंचरणंतथा ॥ पूरयित्वाततोवायुंहृदयेचिवुकंदृढं ॥ निक्षिप्ययोनिमाकुंच्यमनोमध्येनियोजयेत् ॥ धार
यित्वायथाशक्त्यारेचयेदनिलंशनैः ॥ सव्यांगेचसमभ्यास्यदक्षिणेनरमभ्यसेत् ॥ मतमेतत्तुकेषांचित्कंठवंधंवि
वर्जयेत् ॥ राजदंतस्यजिह्वायावंधःशस्तोभवेदिति ॥ अयंकिलमहावंधमहासिद्धिप्रदायकः ॥ महामुद्रावमेनं
ववदंतिविवुधोत्तमाः ॥ वंद्वासेवसमभ्यस्यपर्यासेपुनरभ्यसेत् ॥ यावत्तंख्याभवेत्तुल्यातनोमुद्रांविसर्जयेत् ॥ नाप
थ्यंनहिपथ्यंवरसासर्वेपिनीरसा ॥ अविमुक्तंविषंघोरंपीयूषमिवजीर्यति ॥ क्षयकुष्टगुदावर्त्तंगुल्माजीर्णपुरो
गमाः ॥ दोषाःसर्वेक्षययांतिमहामुद्रांतुयोभ्यसेत् ॥ कथितेयंमहामुद्रामहासिद्धिकरीनृणां ॥ गोपनीयाप्रय
त्नेननदेयायस्यकस्यचित् ॥ पार्ष्णिभागेनपादस्ययोनिस्थानेनियोजयेत् ॥ वामोरूपरिसंस्थाप्यदक्षिणंचरणंत
था ॥ पूरयित्वाततोवायुंहृदयेचिवुकंदृढं ॥ निक्षिप्ययोनिमाकुंच्यमनोमध्येनियोजयेत् ॥ धारयित्वायथा
शक्त्यारेचयेदनिलंशनैः ॥ सव्यांगेचसमभ्यास्यदक्षिणेनरमभ्यसेत् ॥ मतमेतत्तुकेषांचित्कंठवंधंविवर्जयेत्
राजदंतस्यजिह्वायावंधःशस्तोभवेदिति ॥ अयंकिलमहावंधःमहासिद्धिप्रदायकः ॥ कालपाशमहावंधविमो

गुरुः
९९

कुंडलीबोधःकुंडलीबोधितोभवेत् ॥ अनुर्गतासुखुम्नाचहठसिद्धिश्चजायते ॥ वपुःकृशत्वंवदनेप्रसन्नतानादस्फुट
त्वंनयनेवनिर्मले ॥ आरोग्यताविंदुजयोग्निदीपनंनाडीवुसिद्धिंहठसिद्धिलक्षणं ॥ सशैलवनधात्रीणांयथाधारोहि
कुंडली ॥ सुप्तागुरुप्रसादेनयथायागर्त्तिकुंडली ॥ तयापद्मानिसर्वाणिभिद्यंतेग्रंथयोपिच ॥ प्राणस्यशून्यपद
वीतदाराजपथायते ॥ तथाचित्तंनिरालंवंतथाकालस्यवंचनं ॥ सुषुम्नाशून्यपदवीब्रह्मरंध्रंमहापथः ॥ श्मशा
नंसांभवीमध्यमार्गश्चेत्येकवाचका ॥ तस्मात्सर्वप्रयत्नेनप्रवोधयतुमीश्वरीं ॥ ब्रह्मद्वारमुखसुप्तंमुद्राभ्यासंसमा
चरेत् ॥ महामुद्रामहावंधोमहावेधश्चखेचरी ॥ उड्डियानंमूलवंधःततोजालंधराभिधः ॥ करणीविपरीताख्यावज्रो
लीशक्तिचालनं ॥ इदंचमुद्रादशकंजरामरणनाशनं ॥ आदिनाथोदितंसर्वंअष्टैश्वर्यप्रदायकं ॥ वल्लभंसर्वसिद्धा
नांदुर्लभंमरुतामपि ॥ गोपनीयंप्रयत्नेनयथारत्नकरंडकं ॥ कस्यचिन्नैववक्तव्यंकुलस्त्रीसुरतंयथा ॥ वज्रोली
रसरोभिश्चसहजालित्रिधामता ॥ एतेषांलक्षणंवक्षेकर्त्तव्यंचविशेषतः ॥ पादमूलेनवामेनयोनिसंपीड्य
दक्षिणां ॥ पादंप्रसारितंधृत्वाकराभ्यांधारितंसुखं ॥ कंठेवंधंसमारोप्यधारयेद्वायुमूर्द्धतः ॥ यथादंडाहतःसर्पो
दंडाकारःप्रजायते ॥ ऋज्वीभूतातथाशक्तिःकुंडलीसहसाभवेत् ॥ तदासिमननावस्थाजायतेद्विपुनाश्रिना
ततःशनैःशनैरेवरेचयेन्नतुवेगतः ॥ इयंखलुमहामुद्रामहासिद्धैःप्रदर्शिता ॥ महाक्लेशादयोदोषाजायंतेम
रणादयः ॥ महामुद्रांचतेनैववदंतिविबुधोत्तमाः ॥ चंद्रांसेचसमभ्यस्यसूर्यांशेपुनरभ्यसेत् ॥ यावत्तुल्याभवेत्तु

वा॰तं १००

स्थितोभूत्वासोमपानंकरोतियः ॥ मासार्द्धेननसंदेहोमृत्युंजयतियोगवित् ॥ नित्यंसोमकलापूर्णाशरीरंयस्यदेहि
नः ॥ तक्षकेनापिदष्टस्यविषंतस्यनसर्पति ॥ गोमांसंभक्षयेन्नित्यंपिवेदमरवारुणीं ॥ कुलीनंतमहंविद्याइत
रेकुलघातकाः ॥ गोशब्देनोदिताजिह्वातत्प्रवेशोहितालुनि ॥ गोमांसभक्षणंतत्तुमहापातकनाशनं ॥ जिह्वाप्रवे
शनंभूतंवह्निनोत्पादितंखलु ॥ चंद्रात्स्रवतियासम्यक्सास्यादमरवारुणी ॥ मूर्द्धषोडशपद्मपत्रगलितंप्राणाद
वाप्तंहठात्ऊर्ध्वास्योरसनांविधायविपरेशक्तिंपरांचिंतयेत् ॥ तत्कल्लोलजलाकुलंसुविमलंधारामृतंयःपिवेत्
निर्दोषःसमृणालकोमलतनुर्योगीचिरंजीवति ॥ वर्षांतियद्दिलंविकायमनिशंजिह्वारसस्पंदिनीसक्षाराकदय
दुग्धसदृशीसध्वाज्यतुल्यातथा ॥ व्याधीनांहरणंजरांतकरणंशास्त्रागमोदीरणंतस्यस्यादमरत्वमष्टगुणितंसि
द्धांगणाकर्षणं ॥ एवंसर्वेद्धिमयंवीजएकामुद्राचखेचरी ॥ एकादेवोनिरालंवएकावस्थामनोन्मनी ॥ सुचिरंध्यानज

गुरुः १००

नकंपंवस्त्रोतःसमन्वितः ॥ तिष्ठंतीखेचरीमुद्रातस्मिन्शून्येनिरंजने ॥ यथालेपंपिहितंसुखिलंमेरुश्चांतथैव
तस्मिंस्तत्त्वंप्रवदतिसुधीयस्तनमुखनिम्नगा ॥ चंद्रात्सारस्रवतिवपुषस्तेनमृत्युन्नराणांतद्बध्नीयात्करणममलं
नान्यथाकार्यसिद्धि ॥ ॥ इतिश्रीवाराहीतंत्रेदक्षिणाम्नायनिर्वाणपदेषड्विंशपटलः ॥ २६ ॥ भैरवउवाच
पार्ष्णिभागेनसंपीड्ययोनिमाकुंचयेद्दृढं ॥ अपानमूर्द्धमाकृष्यमूलवंधोयमुच्यते ॥ अधोगतमकारंवैऊर्द्ध
गंकुरुतेवलात् ॥ आकुंचनेनतंप्राहुर्मूलवंधंहियोगिनः ॥ गुदपार्ष्णितुसंपीड्यवायुमाकुंचयवलात् ॥

वनविचक्षणः॥ अयंचसर्वनाडीनामूर्द्धगतिनिबोधकः॥ त्रिवेणीसंगमंधत्तेकेदारंपापयेन्मनः॥ रूपलावण्य
सम्पन्नायथास्त्रीपुरुषंविना॥ महामुद्रामहाबंधौनिष्फलौवेधवर्जितौ॥ महावेधास्थितोयोगीकृत्वापूरकमेकधीः॥
वायूनांगतिमावृत्यनिभृतंकंठमुद्रया॥ समहस्तयुगोभूमौस्फिचौसंताडयेच्छनैः॥ पुटद्वयंसमाकृष्यवायुस्फुरतिस
त्वरं॥ सोमसूर्याग्निसंबंधोजायतेचामृतोजयः॥ मृतावस्थासमुत्पन्नाततोवायुंविरेचयेत्॥ महावेधोयमभ्यासा
न्महासिद्धिप्रदायकः॥ वलीपलितवेपघ्नःसेव्यतेसाधकोत्तमैः॥ एतत्त्रयंमहामुद्राजरामृत्युविनाशिनी॥ वह्नि
वृद्धिकरंचैवमनिमादिगुणप्रदं॥ अष्टधाक्रियतेचैवंयामेयामेदिनेदिने॥ सर्वसंवारसंधायीपापौघाभिदुरंस
दा॥ सम्यक्शिक्षावतामेवंस्वल्पंप्रथमसाधनं॥ वह्निस्त्रीपथिसेवानामादौवर्जनमाचरेत्॥ छेदनचालनदोहैः
कलांक्रमेणवर्द्धयेत्॥ सायावद्भ्रूमध्यंचेत्तितदाखेचरमुद्रया॥ कपालकुहरेजिह्वाप्रविष्टाविपरीतगा॥ भ्रुवो
रंतर्गताद्दष्टिर्मुद्राभवतिखेचरी॥ कलांपरांमुखीत्यक्षणार्द्धमपितिष्ठति॥ क्षणोनमुच्यतेयोगीव्याधिमृत्युज
लादिभिः॥ नरोगोमरणंतस्यननिद्रानक्षुधातृषा॥ नचमूर्छाभवेत्तस्ययोमुद्रांवेत्तिखेचरी॥ वाध्यतेनसरोगे
नलिप्यतेनसकर्मणा॥ वाध्यतेनसकालेनयोमुद्रांवेत्तिखेचरी॥ चित्तंचरतिखेयस्माज्जिह्वाचरतिखेगता॥
तेनैवखेचरीमुद्रासर्वसिद्धिनमस्कृताः॥ खेचर्यामुद्रितंयेनविवरंलंविकोर्द्धतः॥ नतस्यक्षरतेविंदुःकामिन्या
लिंगितस्यच॥ चरितोपियदाविंदुःसंप्राप्तश्चाग्निमंडलं॥ व्रजत्यूर्द्धंहठाच्छक्त्यानिरोधोयोगमुद्रया॥ उर्द्धजिह्वा

वा॰तं
१०१

ब्रह्मस्थानस्थितोरोधःप्रयातिपवनोलयं॥ ततोनजायतेमृत्युजरारोगादिकंतथा॥ ऊर्द्धनाभिरधस्तालुरूर्द्धभा
नुरधःशशी॥ करणीविपरीताख्यासर्वव्याधिविनाशिनी॥ नित्यमभ्यासयुक्तस्यजठराग्निप्रवर्द्धिनी॥ आहारो
बहुलस्तस्यसंपाद्यःसाधकस्यतु॥ अल्पाहारोनिराहारःक्षुधाल्तस्यवसाभवेत्॥ अधःशिरश्चोर्द्धपादौक्षणंस्या
त्प्रथमेदिने॥ क्षणाच्चकिंचिदधिकंमभ्यासेच्चदिनेदिने॥ वलितंपलितंचैवषण्मासात्तुनदृश्यते॥ मासत्रयंतु
योनित्यमभ्यसेत्सतुकालवित्॥ स्वेच्छयावर्त्तमानोपियोगोक्तैर्नियमैर्विना॥ वज्रोलींयोविजानातिसयोगीसिद्धि
मान्भवेत्॥ तत्रवस्तुद्वयंवक्ष्येदुर्लभंयस्यकस्यचित्॥ क्षीरंचैवद्वितीयंतुनारीचवशवर्तिनी॥ मेढ्रेणशनैः
सम्यक्कृत्वाकुंचनमभ्यसेत्॥ पुरुषोवापिनारीवावज्रोलीसिद्धिमाप्नुयात्॥ प्रयत्नतःशिरोजालेफूत्कारः
कंदकंदरे॥ शनैःशनैःप्रकुर्वीतवायुसंचारकारणात्॥ नारीभगेपतद्विंदुमभ्यासेनोर्द्धमाहरेत्॥ चलितंच
लितंविंदुमूर्द्धमाकृष्यरक्षयेत्॥ एवंरक्षतियोविंदुंमृत्युंजयतियोगवित्॥ मरणंविंदुपातेनजीवितंविंदुधा
रणात्॥ सुगंधियोगिनोदेहोजायतेविंदुधारणात्॥ यावद्विंदुःस्थितोदेहेतावन्मृत्युभयंकुतः॥ चित्तायत्तंनृणां
शुक्रंशुक्रायत्तंहिजीवितं॥ तस्माच्छुक्रंरजश्चैवरक्षणीयंप्रयत्नतः॥ विंदुमध्येरजोप्येवंविंदविंदुंचरक्षयेत्
मेढ्रेणाकर्षयेदूर्द्धंसम्यगभ्यासयोगवित्॥ अप्रयासप्राप्तवतांधन्यानांतत्त्वदर्शिनां॥ निर्मत्सराणांसिध्यतेनतुम
त्सराणांलिनां॥ सहजोलीचामरोलीवज्रोल्याएकभेदतः॥ जलेषुभस्मनिःक्षिप्यदग्धगोमयसंभवं॥ वज्रोलीमैथु

गुरुः
१०१

६८

वारंबारंतथाचोर्द्धसमायातिसमीरणः॥ प्राणादिनादिनोविंदुमूलबंधेनचैकतः॥ ततोयोगससंसिद्धौप्रमातत्रन
संशयः॥ अपानप्राणयोरैक्यात्क्षयोमूत्रपुरीषयोः॥ युवाभवतिवृद्धोपिसततंमूलबंधनात्॥ अपानेचोर्द्धमायातेस
म्पतःनाभिमंडले॥ तथाननेशिखादीर्घाक्रियतेवायुनाहता॥ ततोवायुवह्नियोगोप्राणायामसउष्णते॥ तेना
भ्यतःप्रदीप्तस्तुकृतोदेहक्षयस्तदा॥ तेनकुंडलिनीसुप्तासंतप्तासंप्रबुध्यते॥ दंडाहताभुजंगीवनिश्वस्यऋजु
नायिका॥ विलंप्रविश्यावततोब्रह्मनाड्यंतरेव्रजेत्॥ तस्मानित्यमूलबंधःकर्त्तव्योयोगिभिःसदा॥ ऊर्द्ध्वंस्थि
तःसुषुम्नायांप्राणस्तुड्डीयतेमतः॥ तस्मातेउड्डीयानोख्यायोगिभिःसमुदाहृतः॥ उड्डीनंकुरुतेयस्मादविश्रा
तंमहाखगः॥ उड्डीयानंतदेयस्याक्षत्रबंधोभिधीयते॥ उड्डियानंतुसहजंगुरुणाकथितंसदा॥ अभ्यसेत्सत
तंयस्तुवृद्धोपितरुणोभवेत्॥ नाभेरूर्द्धमधश्चापितानंकुर्यात्प्रयत्नतः॥ योगीसमभ्यसेत्सम्मृत्युंजयत्येवन
संशयः॥ अतिवज्रासनेपादौकराभ्यांधारयेद्दृढं॥ गुल्फदेशसमीपेचकंदंतत्रप्रपीडयेत्॥ पश्चिमतानमु
परिकारयेद्धृदयगले॥ शनैःशनैर्यथाप्राणस्तदागंधप्रगच्छति॥ सर्वेषामेवबंधानामुत्तमोउड्डियानकः॥ उड्डियाने
दृढबंधेमुक्तिःस्वाभाविकीभवेत्॥ कंठमाकुंच्यहृदयेस्थापयेद्दृढमिच्छय॥ बंधोजालंधराख्योयंजरामृत्युविनाश
कः॥ बध्नातिहिशिराजालमधोगामिनभोजलं॥ ततोजालंधरोबंधःकंठदुःखौघनाशनः॥ जालंधरेकृतेबंधे
कंठसंकोचनेकृते॥ मध्यमपश्चिमतानेनस्यात्प्राणोमध्यनाडिगः॥ इडाचपिंगलाचैवबाह्येयत्पश्चिमेपथं॥

वतीगंगापिंगलायमुनानदी॥ इडापिंगलयोर्मध्येबालरंडासरस्वती॥ पुच्छेप्रगृह्यभुजगींसुप्तामुद्बोधयंच्चतां
वा॰तं १०२ निद्रांविहायसाक्रम्यऊर्द्धमुत्तिष्ठतेहठात्॥ अवस्थिताचैवफणावतीसाप्रातश्चसायंप्रहरार्द्धमात्रंप्रसार्यसूर्य
परिधानयुक्त्याप्रगृह्यनित्यंपरिचालनीया॥ वितस्तिप्रमितंदीर्घविस्तारेचतुरंगुली॥ मृदुलंधवलंप्रोक्तंवेष्टना
म्बरलक्षणं॥ वज्रासनस्थितोयोगीचालयित्वाचकुंडली॥ कुर्यादनंतरंभस्त्रांकुंडलीमाशुबोधयेत्॥ भानोराकुंचने
नैवकुंडलीचालयेत्ततः॥ मृत्योर्वक्त्रगतस्यापितस्यमृत्युभयंकुतः॥ नाभादक्षिणमार्गवाहिपवनाप्राणेभिदीर्घो
कृतोवराडाभःपरिपूरिनामततनुःप्राग्घटिकायास्तथा॥ छित्वात्कालविशालवह्निवशगोभूरंध्रनाडीगणांत
त्कार्यंकुरुतेप्रनर्नवतरंवित्तक्रमस्कंधयन्॥ कुंडलीचालयित्वाथकुर्याद्भस्त्रींविशेषतः॥ एवमभ्यस्यतोनित्य
यमिनस्तुकुतोयमः॥ यदात्मसेत्सूर्यभेदमुज्वलीवापिशीतली॥ एवमभ्यासयोगेनशमनोयमिनाकुतः॥ मुहू
तद्वयपर्यंतंनिर्भयंचालनादसौ॥ ऊर्द्ध्वमाकृष्यतेकिंचित्सुषुम्नायाःसमुद्गतः॥ तेनकुंडलिनीतस्याःसुषुम्नाया गुरू
मुखंध्रुवं॥ जहातितस्मात्प्राणोयंसुषुम्नांव्रजतिनिश्चलां॥ तस्मात्तांचालयेन्नित्यंसुखसुप्तामरुंधती॥ यस्यासंचा १०२
लयेनाशुयोगीरोगात्प्रमुच्यते॥ येनसंचालिताशक्तिःसयोगीसिद्धिभाजनं॥ किमत्रबहुनोक्तेनकालंजयति
लीलया॥ ब्रह्मचर्यरतस्यैवनित्यंहितमिताशिनः॥ मंडलाद्दृश्यतेसिद्धिःकुंडल्याभ्यासयोगतः॥ अभ्यासेविस्त
तांचाडीविभूनांसहमभिषेचयेत्॥ तांधारयेदुत्तमांगेदिव्यदृष्टिप्रदायिनी॥ द्विसप्ततिसहस्राणांनाडीनांमलशोधने

नाहूर्द्धंस्त्रीपुंसाःस्वांगलेपनं॥आसीनयोःसुखेनैवमुक्ताव्यापरयोक्षणं॥सहजोलीरियंप्रोक्तासाश्रद्धेयायोगिभिःस
दा॥अयंशुभंकरोयोगोभोगेभुक्तेपिमुक्तिदः॥विहायनित्यंप्रथमांवधारांविहायनिःसारतमांत्यधारं॥निषव्य
तेशीतलमध्यधाराकपालिकेकुंठमतेरमेध्या॥अमरीयोपिबेन्नित्यंनस्यंकुर्याद्दिनेदिने॥वज्रोलीमभ्यसेत्स
त्वेअमरोलीतिकथ्यते॥पुंसोविंदुसमाकुंच्यसम्यगभ्यासपाटवात्॥यदिनारीरजोरक्षेत्सयोगीवासियोगिनी॥
तस्माकिंचिद्रजोनाशंनगच्छतिनसंशयः॥तस्याशरीरेनादश्चविंदुनाविंदुगच्छति॥सविंदुतद्रजश्चैवएकेभूता
स्वदेहजैः॥वज्रोल्याभ्यासयोगेनसर्वसिद्धिःप्रजायते॥मेढ्रानाकुंचनादूर्द्धंरजसासिद्धियोगिनी॥अतीतानाग
तवेत्तिखेचरेवभवेद्ध्रुवं॥देहसिद्धिंचलभतेवज्रोल्याभ्यासयोगतः॥तस्मादयंसाधकानांभोगमुक्तिविमु
क्तिदः॥तस्मात्पुण्यवतामेवयोगोयंसंप्रसिध्यति॥कुटिलांगीकुंडलिनीभुजंगीशक्तिरीश्वरी॥कुंडल्यारुंधदे
वीतिशब्दापर्यायवाचका॥उद्घाटयेत्कपाटंतुयथाकुंचिकयाहठात्॥कुंडलिन्यातथायोगीमोक्षद्वारविभेद
येत्॥येनमार्गेनगन्तव्यंब्रह्मस्थाननिरामयं॥मुखेनाछाद्यतद्द्वारंप्रसुप्तापरमेश्वरी॥कंदोर्द्धकुंडलीशक्तिर
ष्टधाकुंडलाकृतिः॥वंधनायचमूढानांसदामोक्षाययोगिनां॥अंभोदिशिखिदीपानांआधारःशेषकुंडला॥अशे
षयोगतंत्रीणांआधारःकुंडलीतथा॥कुंडलीकुटिलाकारासर्पवत्परिकीर्तिता॥साशक्तिश्चालितायेनसमुक्तो
नात्रसंशयः॥गंगायमुनयोर्मध्येवालरंडांतपस्विनी॥बलात्कालेनगृह्णीयातद्विष्णोःपरमंपदं॥इडाभंग

प्रबुद्धायामादिशक्तौप्राणःशून्यविलीयते॥उत्पन्नशक्तिबोधस्यत्यक्तनिःशेषकर्मणः॥योगिनसहजावस्थास्वयमेवप्रकाशते
वा॰तं सुषुम्नावाहिनीप्राणेशून्येविशतिमारुते॥तदासर्वाणिकर्माणिनिर्मूलयतियोगवित्॥अमरायनमस्तुभ्यंसोपिकालस्त्वयाहतः
१०३ पतितंपवनेयस्यजगदेतच्चराचरं॥चित्तेसमत्वमापन्नेवायुव्रजतिमध्यमे॥तथामरोलीवज्रोलीसहजोलीमतोपिव॥ज्ञानंकुतो
मनसिजीवतिदेहियावत्प्राणोपिजीवमनोस्तिपतेनयावत्प्राणोमनोद्वयमिदंविलययातिमोक्षंसगच्छतिनरोनकथंचि
दन्यत्॥ज्ञात्वासुषुम्नासद्भेदंकृत्वावायुंचमध्यगं॥स्थित्वासदैवसुस्थानेब्रह्मरंध्रेनिरोधयेत्॥सूर्यचंद्रसमाकृत्वादत्वाकारापि
पंजरे॥सुषुम्नाशांभवीशक्तिःशेषास्त्वेवनिरर्थकाः॥वायुःपरिचितोयस्मादग्निनासहकुंडली॥अथचिंतांतरेभ्यासप्रत्यासा
जीवयोगिना॥पवनोवध्यतेयेनतेनैववध्यतेमनः॥हेतुद्वयंतुचित्तस्यवासनाचसमीरणः॥तयोर्विनष्टएकस्मिंस्तद्द्व
नापिविनश्यतः॥तत्रैवलीयतेवायुःमनस्तत्रैवलीयते॥दुग्धांबुवत्संमिलितावुभौतौतुल्यक्रियौमानसमारुतौहि॥यतो
मरुत्तत्रमनःप्रवृत्तिर्यतोमनस्तत्रमरुत्प्रवृत्तिः॥एकस्यनाशादपरस्यनाशस्तत्रैवप्रवृत्तेरपरस्यवृत्तिः॥अध्वस्तयोश्चे
न्द्रियवर्गवृत्तिःविध्वस्तयोर्मोक्षपदस्यसिद्धिः॥रसस्यमनसश्चैवचंचलत्वंस्वभावतः॥रसोबद्धोमनोबद्धंकिंनसिध्यति
भूतले॥मूर्छितोहरतेव्याधिंमृतोजीवयतिस्वयं॥वद्धखेचरतांधत्तेसजीवशोरसेश्वरः॥वायुमार्गेवसंचारेसफलं
लभतेमहः॥ततोष्टगुणमैश्वर्यंसत्यमित्याहशंकरः॥मनःस्थैर्येस्थिरोवायुस्ततोविंदुःस्थिरोभवेत्॥विंदुस्थैर्याद गुरुः
यासत्वंपिंडस्थैर्यंप्रजायते॥इंद्रियाणांमनोनाथोमनोनाथस्तुमारुतः॥मारुतस्यलयोनाथस्तन्नाथंलयमाश्रयेत् १०३
स्वयमेवामोक्षस्त्वल्पिवापिमत्रांतरोमनः॥प्राणापानमपानंताद्वयकाश्चित्तवर्तते॥प्रनष्टोच्छ्वासनिःश्वासःप्रणष्ट
विषयग्रहः॥निश्चलोनिर्विकारश्चलयोजयतियोगिनः॥उच्छिन्नसर्वसंकल्पोनिःशेषाशेषचेष्टितः॥स्वावगम्योल
यःकोपिजायतेवाग्गोचरः॥यत्रदृष्टिर्लयस्तत्रभूतेंद्रियसनातनः॥साशक्तिर्जीवभूतानांद्वेअलक्ष्येलयंगते॥वेदशा

रुडप्रक्षालनोपायः कुंडलिन्यासमुच्यते ॥ इति मुद्रा दशधा प्रोक्ता आदिनाथेन शंभुना ॥ कारणं सर्वसिद्धीनामेकैकापि मे वसा ॥ रा
जयोगं विना पृथ्वी राजयोगं विना निशा ॥ राजयोगं विना मुद्रा विचित्रापि न राजते ॥ मारुताभ्यासनं किंचिन्मनोयुक्तं स
माचरेत् ॥ इतरेत्र न कर्त्तव्या मनोवृत्तिर्मनीषिणा ॥ विनापि मध्यमा नाडी रोदयाश्वासेन योगिनः ॥ आसनं धारणा संया
मं मुद्रापि सरला भवेत् ॥ अभ्यासेन हि पुत्राणां तदुन्नतिसमाधिना ॥ मुद्राणां चापरा मुद्रा भद्रा सिद्धिं प्रयच्छति ॥
उपदेशं हि मुद्राणां यो धत्ते सांप्रदायिकं ॥ स एव श्रीगुरुः स्वामी साक्षादीश्वर एव सः ॥ तस्य वाक्यपरो नित्यसंधा
स समाहितः ॥ अणिमादिगुणैश्वर्यं लभते कालवंचकः ॥ नमः शिवाय गुरवे नादबिंदुकलात्मने ॥ निरंजनपदं या
ति यतो योगी परायणः ॥ अथेदानीं प्रवक्ष्यामि समाधिक्रममुत्तमं ॥ मृत्युघ्नं च सुखोपायं ब्रह्मानंदकरं परम् ॥
राजयोगः समाधिश्च उन्मनी च मनोन्मनी ॥ अमरौघारयस्तत्त्वं शून्याशून्यं परं पदं ॥ अमनस्कं तथाद्वैतं निरालंबं
निरंजनं ॥ जीवन्मुक्तिः पदं सप्त पर्यायवाचकं ॥ सलिले सैंधवं यद्वत्साम्यं भजति योगतः ॥ यथात्ममनसो
रैक्यं समाधिरभिधीयते ॥ तत्समं च द्वयोरैक्यं जीवात्मापरमात्मना ॥ समस्तनष्टसंकल्पः समाधिः सोभिधीय
ते ॥ समाधिस्तु तथा ज्ञानं कर्पूरं सलिले यथा ॥ तथात्ममनसोरैक्यं समाधिः सोभिधीयते ॥ राजयोगस्य माहा
त्म्यं को वा जानाति तत्त्वतः ॥ ज्ञानं मुक्तिः स्थितिः सिद्धिः गुरुवाक्येन सिध्यति ॥ दुर्लभो विषयत्यागो दुर्लभं तत्त्वद
र्शनं ॥ दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥ यावन्नैव प्रविशति चरन्मारुतो मध्यमार्गे यावद्बिंदुर्न भवति दृ
ढः प्राणवातः प्रबंधः ॥ यावद्ध्याने सहजसदृशं जायते नैव चित्तं तावज्ज्ञानं वदति यदिदं दंभमिथ्याप्रलापः ॥ वा
युमार्गेण संचारस्य कलं लभते महत् ॥ तथाष्टगुणमैश्वर्यं सत्यं सत्यं वरानने ॥ विविधैरासनैः कुंभैर्विचित्रैः करणैरपि

वा·तं
१०४

पूर्णकुंभ इवार्णवे ॥ बाह्यचिंता न कर्तव्या तथैवांतरचिंतनं ॥ सर्वचिंता परित्याज्या न किंचिदपि चिंतये ॥ ज्ञेयं सर्वमयीतं च ज्ञानं च मन
सि उच्यते ॥ ज्ञानं ज्ञेयं मनश्चैव नान्यः पंथो द्वितीयकः ॥ मनो दृश्यमिदं सर्वं यत्किंचित्स चराचरं ॥ मनसो ह्युन्मनीभावो द्वैतं नै
वोपलभ्यते ॥ ज्ञेयवस्तुपरित्यागाद्विलयं याति मानसं ॥ मानसो विलये याते कैवल्यमपि कल्पते ॥ लयो लय इति प्राहुः कीदृ
शं लयलक्षणं ॥ अपुनर्वासनोत्थानाल्लयो विषयविस्मृतः ॥ एवं नानाविधोपायाः सम्यक्स्वानुभवान्विता ॥ समाधिमार्गाः कथि
ताः पूर्वाचार्यैर्महात्मभिः ॥ असक्यं तत्त्वबोधीनां मूढानामपि सम्मतं ॥ प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते ॥ श्री आदिनाथे
न सपादकोटिलयप्रकाराः कथिता जयंति ॥ नादानुसंधानकमेव चान्यं संमन्यामहे रत्नेसं लयानां ॥ श्रवणपुटनयनयुगलघ्रा
णमुखरोधनमेव कर्त्तव्यं शुद्धसुषुम्नाशरणौ स्फुटममलः श्रूयते नादः ॥ आरंभश्च घटश्चैव तथा परिचयस्ततः ॥ निष्पत्ति
सर्वयोगेषु स्यादवस्थाचतुष्टयं ॥ ब्रह्मग्रंथिर्भवेद्भिन्नानादः शून्ये समुद्भवः ॥ विचित्रः क्वणको देहेनाहतः श्रूयते ध्वनिः ॥ दिव्यगं
धा दिव्यवक्षस्तेजस्वी तु अरोगवान् ॥ संपूर्णहृदयः शून्य आरंभो योगवान्भवेत् ॥ द्वितीयभेदयुक्तेतु वायुर्भवति मध्यगः ॥
दृढासनो भवेद्योगी ज्ञानी देवसमस्तथा ॥ विष्णुग्रंथिस्तथा भेदात्परमानंदसूचकः ॥ अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भ
वेत् ॥ अथ ग्रंथित्रयं भित्वा जायते मर्दलध्वनिः ॥ महाशून्ये समायाति सर्वसिद्धिसमाश्रयः ॥ चित्तानंदं ततो जित्वा सहजा
नंदसंभवः ॥ दोषदुःखजरामृत्युः क्षुधानिद्रात्तृषा तथा ॥ रुद्रग्रंथिस्ततो भित्वा सर्वपीठगतोनिलः ॥ निष्पत्तौ वैणवः शब्दः क्व
णन्नादो क्वणो भवेत् ॥ एकीभूतं तथा चित्तं राजयोगाभिधानकं ॥ सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत् ॥ राजयोगपदं
प्राप्य सुखवायोल्पचेतसां ॥ सद्यः प्रत्ययसंधायी सेव्यते नादयोलयः ॥ नादानुसंधानसमाधिभाजां योगीश्वराणां हृदि वर्ध
मानं ॥ आनंदमेकं वचसामवाच्यं जानाति तं श्रीगुरुनाथ एव ॥ मुक्तासनास्थितो योगी मुद्रां संधाय शांभवीं ॥ शृणुयाद्दक्षि

गुरु
१०४

स्वपुराणानि सामान्योगणिकाइव ॥ एकैवशांभवीविद्यागोप्याकुलवधूरिव ॥ अंतर्लक्षमनोदृष्टिर्निमेषांमेषवर्जिता ॥ एषातु
शांभवीमुद्रासर्वमंत्रेषुगोपिता ॥ अनंतलक्षविलीनचित्तपवनोयोगीयथावर्त्तते दृष्ट्यानिश्चलतारयावहिरधःपश्यन्नपश्यन्नपि ॥ मुद्रे
यंखेचरीभवतिसायुष्मत्प्रसादाद्गुरोःशून्याशून्यविवर्जितंस्फुरतितत्तत्वंपदंशांभवं ॥ ताराज्योतिषुसंयोज्योकिंचिदुन्नारयेद्भ्रुवौ ॥ स्यु
गतस्यमार्गेषु उन्मनीकाललक्षणा ॥ केचिदागमयोगेनकेचिन्निगमसंकुले ॥ केचित्तर्केनमुह्यंतिनैवजानंतितारकं ॥ अर्द्धोन्मीलितलो
चनस्थिरमनोनासाग्रदत्तेक्षणश्चंद्रार्कंचविलीयतांतरमुनोनिक्षिप्यभासान्तरे ॥ ज्योतीरूपमशेषवाह्यरहितंदेदीप्यमानपरंतत्व
प्रश्वरमचवस्तुपरमंवाच्यंकिमुत्राधिकं ॥ वासरेपूजयेल्लिंगंरात्रौचैकनपूजयेत् ॥ सततंपूजयोल्लिंगंदिवारात्रौनपूजयेत् ॥ सुखि
नज्ञानजनकंपंचस्त्रोतःसमन्वितं ॥ तिष्ठतेखेचरीमुद्रातस्मिंश्शून्यनिरंजने ॥ सव्यदक्षिणानाडिस्थोमध्यवाहोतमारुतः ॥ तिष्ठते
खेचरीमुद्रातत्रसत्यंनसंशयः ॥ सोमसूर्यद्वयोर्मध्येनिरालंवंतथापुनः ॥ संस्थितावोमचक्रेयासामुद्रानामखेचरी ॥ सोमयो
र्भेदितावामसाक्षाद्देशिववल्लभा ॥ पूजयेदतुलादिव्यासुषुम्नादक्षिणेमुखे ॥ पुरस्ताच्चैवपूर्यतनिश्चितास्खेचरीभवेत् ॥ अभ्य
स्ताखेचरीमुद्राउन्मनीसंप्रजायते ॥ अभ्यसेत्खेचरीमुद्रातावत्स्याद्योगनिद्रता ॥ संप्राप्तयोगनिद्रस्यकालोनास्तिकदाचन ॥ भ्रु
वोर्मध्येशिवस्थानंमनस्तत्रविलीयते ॥ ज्ञातव्यंतत्पदंतूर्यंतत्रकालोनविद्यते ॥ चंद्रसूर्यद्वयोर्मध्येमुद्रादद्याच्चखेचरी ॥ निरा
लंवेमहाशून्यव्योमचक्रव्यवस्थितं ॥ निरालंवंमनःकृत्वानकिंचिदपिचिंतयेत् ॥ सवाह्याभ्यंतरंव्योम्निघटवत्तिष्ठतिध्रु
वं ॥ वाह्यवायुर्यथालीनस्तथामध्येनसंशयः ॥ स्वस्थानगछतिप्राणःसूर्यंगिपवनेतथा ॥ एवमभ्यस्यमानस्यवायुमार्गे
सदानिशं ॥ अभ्यासाज्जायतेवायुर्मनस्तत्रविलीयते ॥ अजरत्वंभवेद्देहेआपदतलमस्तके ॥ सिध्यतेचमहायोगोमहाव
लपराक्रमः ॥ शक्तिमध्येमनःकृत्वाशक्तिर्मनसिमध्यतः ॥ मनसामनसोलोकेधारयेत्परमंपदं ॥ खमध्येकुरुचात्मानमा
त्ममध्येचखंकुरु ॥ सर्वमयंचखंकृत्वानकिंचिदपिचिंतयेत् ॥ अंतःशून्योवहिःशून्योशून्यःकुंभइवांवरे ॥ अंतःपूर्णोवहिःपूर्णः

यंतेतिस्वरेमनसाहृते ॥ नादकोटिसहस्राणिविंदुकोटिशतानिच ॥ सर्वेतत्रलयंयांतियत्रदेवोनिरंजनं ॥ एवंश्व
ष्टिमयंवीजंएकामुद्राचखेचरी ॥ एकोदेवोनिरालंवएकावस्थामनोन्मनी ॥ शंखदुंदुभिनादंचनश्रुणोतिकदाचन ॥
वा॰तं १०५ काष्ठवज्जायतेदेवउन्मन्याअवस्थाध्रुवं ॥ सर्वावस्थाविनिर्मुक्तासर्वचिंताविवर्जिता ॥ मृतवत्तिष्ठतेयोगीसमुक्तो
नात्रसंशयः ॥ अवध्यसर्वशास्त्राणांमवध्यःसर्वदेहिनां ॥ अयाह्यमंत्रतंत्राणांयोगीयुक्तसमाधिना ॥ प्रवेशोनिर्ग
मेचैवदक्षिणोवामध्यमः ॥ नपश्यवायुर्वहतिसमुक्तोनात्रसंशयः ॥ चित्तंनसुप्तंनोजाग्रस्मृतिवस्तुवनान्यथा
नास्तिमेतिनचोदेतियथासोमुक्तएवसः ॥ स्वष्टिःस्थिरायस्यविनैवदृश्यंवायुःस्थिरोयस्यविनाप्रयत्नतः ॥ चित्त
स्थिरंयस्यविनावलंवंसएवमुक्तःसगुरुःससेव्यः ॥ विद्यातीर्थंजगतिविवुधासाधवःसत्यतीर्थंगंगातीर्थं
मलिनमनसोयोगिनोज्ञानतीर्थे ॥ धारातीर्थेधरणिपतनोदानतीर्थंध्रुभक्ताःलज्जातीर्थःकुलयुवतयःपात
कंक्षालयंति ॥ ॥ इतिश्रीवाराहीतंत्रेदक्षिणाम्नायेनिर्वाणपदेसप्तविंशतितमःपटलः ॥ २७ ॥ श्रीभैरव
उवाच ॥ शृणुदेवीप्रवक्ष्यामिषोडशमातृकांविकां ॥ वाराहीनीलकालीचकथयामियथाक्रमं ॥ गौरीपद्माशची गुरुः १०५
मेधासावित्रीविजयाजया ॥ दिवसेनास्वधास्वाहामातरोलोकमातरः ॥ हृष्टिःपुष्टिस्तथातुष्टितथात्मकुलदेव
ता ॥ धम्मिल्लसंयुतकेशाविधोश्चाधोमुखीगला ॥ केशांतेतिलकस्याद्धेदृधवीसुमनोहरा ॥ मनिकुंडलसंघ
ष्टगंडामुकुटमंडिता ॥ सत्पोतिकर्णपूरांवाकर्णवापूर्यसंगता ॥ सुवर्णमणिमाणिक्यनागहारविराजिता
सदासुगंधिभिःपद्मैरसानेरतिसुंदरी ॥ मोलांविभर्त्तिग्रीवायांरत्नकेयूरधारिणी ॥ मृणालायतहस्तैश्चवाहुभिः
कोमलैःशुभैः ॥ राजतीकंचुकोपेतपीनोन्नतपयोधरा ॥ क्षीणमध्यापीतवस्त्रात्रिवलीमध्यभूषिता ॥ भूलंव

योकर्णौनादमंतर्गतेमहत्॥अभ्यस्यमानोनादोयंबाह्यमावृणुतेध्वनि॥पक्षाद्विपक्षमखिलंजित्वायोगीसुखीभवेत्॥श्रूयतेप्रथ
माभ्यासेनादोनानाविधोमहान्॥वर्द्धमानेततोभ्यासेश्रूयतेसूक्ष्मसूक्ष्मतः॥आदौजलधिजीमूतभेरीनिर्भरनिःस्वनः॥म
ध्यमर्दलशंखेवघंटाकोलाहलस्तथा॥अन्तेतुकिंकिणीवंशवीणाभ्रमरनिःस्वनः॥इतिनानाविधानादाश्रूयतेयत्रमध्य
तः॥महत्यश्रूयमानेपिमेघभेर्यादिकध्वनौ॥तत्रसूक्ष्मंनादमेवपरितोपिपरामृशेत्॥ध्वनिमुत्सृज्यवास्थूलंसूक्ष्मेसूक्ष्ममुत्स
ज्यवायवे॥स्मशानमपिक्षिप्रंवमनोनेत्रप्रवारयेत्॥यत्रकुत्रापिवानादेलगतिप्रथममनः॥तत्रैवनिश्चलीभूत्वातेन
सार्द्धविलीयते॥कोष्ठप्रवर्त्ततेबाह्यकोष्ठेनसहसाम्पतिं॥नादेप्रवर्त्ततेचित्तंनादेनसहलीयते॥औदासीन्यपराभू
त्वासदाभ्यासेनसंशयः॥उन्मनीकारकंसद्योनादमेवावधारयेत्॥ज्ञानेकाष्ठोपटीकुंडीवापथ्याहारोगोपयोवाघयोवा
भोज्यभोक्तंवान्नमाकंदयावाडोराणीवाप्यवोपभोज्यैवपात्रं॥सर्वचिंतांसमुत्सृज्यसर्ववेष्टावसर्वदा॥नादमेवानसंध
त्तेयोगसाम्राज्यमिच्छति॥मकरंदामिवंभृंगोगंधनोप्यक्षतेयथा॥नादेशक्तंतथाचित्तंविषयानहिकांक्षति॥बद्ध
विमुक्तंवावल्पनादगंधकरीरणात्॥मनःपारदमाप्नोतिनिरालंबाख्यखेटन॥बद्धाचेनादगंधेनसद्यःसत्पक्षवाप
ले॥प्रयातिसाखनाश्वेवअपाछछिन्नतरक्रमा॥नादप्रराणतनित्तस्यमंतरंगाभुजंगमं॥विस्मृत्यविश्वमेकाग्रंकुत्र
चिन्नहिधावति॥मनोन्मत्तगजेंद्रस्यविषयोद्यानवारिणः॥नीयमानस्समर्थोयंनिनादनिशितांकुशं॥नादांतरंतुसं
गस्यवाजिनःपरिखावते॥अंतरंगतुरंगस्ययोगीवागीयतेपिच॥अनाहतध्वनेचेतज्ञेयंयत्सूक्ष्मसूक्ष्मकं॥मनस्त
त्रलयंयातितद्विष्णोःपरमंपदं॥भावनाकाशसंकल्पोयावच्छंदःप्रवर्त्तते॥निःशब्दंतत्परंब्रह्मपरमात्मानुमीयते
नादशक्तिरितिख्याताताद्रानंसदाशिवं॥नादज्ञानेननष्टेनतद्रुन्मन्यवशिष्यते॥नादोयावन्मनस्तावन्नादांतेतुम
नोन्मनि॥सशब्दकथितंव्योमनिःशब्दंब्रह्मकथ्यते॥यतनादानुसंधानात्संक्षीणोवासनोदये॥निरंजनेवली

बा॰तं
१०६

प्येवंशुचिःकुर्यादुदंमुखः॥शुचिःसुवस्त्रधकप्राज्ञोमौनीध्यानंपरायणः॥गतकामभयेद्वंद्वोरोगमोत्सर्यवर्जितः
आत्मानंपूजयित्वावशुगंधसितवाससा॥सर्वमूर्त्तेयजेद्देवानस्वकीयामनसंस्थितान्॥सर्वंसुगंधजातं
सुप्रसन्नोमलयोद्भवः॥तस्मात्सर्वप्रयत्नेनदद्यामलयजंसदा॥घृततिलाश्चहोमार्थेमदद्येवानुलेपनं
चंदनागुरुकर्पूरंनखधूपेवरंमतं॥चंदनाख्यंलेपनंदद्यंसर्वसिद्धिप्रदायकं॥कृष्णागुरुःसकर्पूरःसहि
तोमलयोद्भवैः॥कुंकुमागुरुकस्तूरीचंद्रभागैःसमाकृतैः॥गंधःप्रीतिप्रदादेव्याद्दुर्गायासहशंभुना॥मद
कर्पूरकाश्मीररोचनानांचतुष्टयं॥एतेनलेपयेद्देवींसर्वकामानवाप्नुयात्॥पुष्पैररणपसंभूतैःपत्रैर्वा
गिरिसंभवैः॥अपर्युषितनिश्छिद्रैःप्रोक्षितैर्जंतुवर्जितैः॥आत्मारामोद्भवैर्वापिपुष्पैःसंपूजयेच्छिवां॥सतुका
लोद्भवैःपुष्पैर्मल्लिकाजातिकुंजकैः॥सितरक्तैस्तथापद्मैःनीलपद्मैश्चपांडरैः॥किंशुकैस्तगरैश्चैवकिंकि
रातैःसचंपकैः॥बकुलैश्चैवमंदारैःकुंदपुष्पैस्तिरोटकैः॥करवीरार्कपुष्पैश्चश्यामाशसैश्चापराजितैः॥सितर तृ: १०६
क्तैस्तथापीतैःकृष्णैश्चैवचतुर्विधैः॥धत्तूरकानिमुक्तैश्चबंधुकागस्तिसंभवैः॥मदनैस्सिंदुवारैश्चसुरभोमरु
वकैस्तथा॥लताभिर्ब्रह्मवृक्षस्यदुर्वांकुरैश्चकोमलैः॥मंजरीभिःकुशानांचबिल्वपत्रैःसुशोभनैः॥उत्पलकै
स्तथासर्वजलजैस्थलसंभवैः॥पत्रैःपुष्पैर्यथालाभंसर्वौषधयुतैःशुभैः॥आत्मानासर्वपत्रैश्चपुष्पैश्चैवप्र
पूजयेत्॥अलाभेपुष्पजातीनांपत्राण्यपिनिवेदयेत्॥पत्राणामप्यलाभेतुओषधीश्चनिवेदयेत्॥ओष

ग्रंथवानंच खड्गंशक्तिंतथैव च ॥ दक्षिणैः पाणिभिर्देवी गृहीत्वादित्य पूजिता ॥ गदां घंटां च चापं च चर्म शंखं तथैव च
ऊर्द्ध्वादिक्रमतो देवी दधती वामपाणिभिः ॥ सिंहस्योपरि निष्ठति व्याघ्रचर्मणि कौशिकी ॥ बिभ्रती रूपमतुलं
सुरासुरमोहनं ॥ नीलोत्पलदलश्यामा चतुर्बाहुसमन्विता ॥ खट्वांगं चन्द्रहासं च बिभ्रती दक्षिणे करे ॥ वामे चर्म
च पाशं च ऊर्ध्वाधोभावतः पुनः ॥ दधती मुण्डमालां च व्याघ्रचर्मधरा सुरा ॥ कृशांगी दीर्घदंष्ट्रा च अतिदीर्घातिभीष
णा ॥ लोलजिह्वा निमग्नरक्तनयना रासभीषणा ॥ कबन्धवाहनासीना विस्तारिश्रवणानना ॥ एषा काली समाख्या
ता चामुण्डेति च कथ्यते ॥ जयन्ती मंगला काली भद्रकाली कपालिनी ॥ दुर्गाक्षमा शिवा धात्री स्वाहा स्वधा नमोस्तु
ते ॥ अनेनैव तु मंत्रेण जपहोमौ प्रकारयेत् ॥ गंधपुष्पं तथा धूपं दीपं नैवेद्यमेव च ॥ यस्य यद्दीयते वस्त्रम
लंकारादिकिंचन ॥ तेषां देवतमुच्चार्य कृत्वा प्रोक्षणपूजयेत् ॥ उत्सृज्य मूलमंत्रेण प्रतिनाम्नानि वेदयेत्
यद्दीयते च देवेभ्यो गंधपुष्पादिकं तथा ॥ अर्घपात्रस्थितैस्तोयैरभिषिंच्यतदुत्सृजेत् ॥ विना पात्रेण यः कु
र्यात्सुतिष्ठांयाज्ञिकीक्रियां ॥ विफलायते सर्वा गृहनादिधनापहा ॥ बलिहीने तु दुर्भिक्षं गंधहीने त्वसाकता ॥
धूपहीने तथा रोगं वस्त्रहीने धनक्षयः ॥ रत्नहीने म्रियेज्जायो विपत्ता केचनायकः ॥ छत्रहीने हरेच्छत्रं विता
ने रमनोहरेत् ॥ वेदहीने तु नाशः स्यान्नगरस्य पुरस्य च ॥ कलशैर्वधनाशाश्च भवेदेशनिउक्त च ॥ तोरणाना
शभावात् हन्योज्ञातिसर्वावधवान् ॥ दक्षिणाविहीने सर्वव्यर्थस्यान्नात्र संशयः ॥ मंत्रविद्याविहीनं तु संपूर्णम
पिनश्यति ॥ पात्रमंत्रसमायुक्तं सर्वदोषापहं भवेत् ॥ रात्राबुद्दंमुखः कुर्याद्देवकार्यं सदैव हि ॥ शिवार्चनं समा

रघुनादिकान् ॥ कृत्वा मिश्रीकृतं स्नेहं तामिश्रं नरकं व्रजेत् ॥ पद्मसूत्रभवो दर्भगर्भसूत्रभवाथवा ॥ शणजा वादरो वापि प
वा·तं १०७ लकोटिभवाथवा ॥ वर्तिकादीपकृत्येषु सदापंचविधाः स्मृताः ॥ शाणं वादरं वस्त्रं च जीर्णं मलिनमेव च ॥ उपयुक्तं तु ना
द्याद्वर्तिकार्थं कदाचन ॥ नैव निर्वापयेद्दीपं देवार्थमुपकल्पितं ॥ दीपहर्ता भवेदंधः काणो निर्वापणाद्भवेत्
नैवेद्यं सुप्रदत्तं च देयं देव्यास्स्वभाविते ॥ परमान्नं पिष्टकं च यावकं कृशरं तथा ॥ मोदकं पृथुकापोलिकं दुग्ध
वर्णिवोत्सृजेत् ॥ हविष्यान्नोदनं दिव्यं माषयुक्तं सशर्करं ॥ निवेदयेन्महादेव्यै सर्वाणि व्यंजनानि च ॥ क्षीरान्
दीन्यग्रमानि महिषाणि चशर्वशः ॥ कपित्थं लांगलं चैव द्राक्षाक्रमुकमेव च ॥ वकुलं च मधूकं च रसाला
म्रातकं तथा ॥ औदुंबरं च पुन्नागं करुणं कर्कटीफलं ॥ हरीतकीमामलकं षड्विधं नागरंगकं ॥ मातुलुंगं च
लक्षं च कदलीकरमर्दकं ॥ शृंगाटकं कशेरुं च शालूकं च मृणालकं ॥ कुसुमानां पंकजानां फलानि विनिवेद
येत् ॥ वाराप्रियेभ्यश्च नैवेद्यं लाजाक्षतफलादिभिः ॥ दुग्धदधिसिताभिश्च लवणी नागरंगकैः ॥ पूजयेज्जगतीधा
त्री सर्वकामार्थसिद्धये ॥ एवं वा लक्षणोपेतं गंधधूपसुगंधिनं ॥ विधिवत्कालिकालीति जप्त्वा खड्गे तथा श्रीः
तयेत् ॥ एवं वा वंपं च वार्षिकं महिषसज्जमेव च ॥ तदुत्थं रुधिरं मांसं गृहीत प्रनादिष्टु ॥ नैर्ऋत्येभ्यः प्रदात १०७
व्यं महाकौशिकमंत्रितं ॥ तस्याग्रतो न पश्चाद्या छत्रं कृत्वा धपिष्टकं ॥ खड्गेन घातयित्वा तु दद्यात्स्कंदविशा
खयोः ॥ ततो देवीं स्नापयेच्च क्षीरसर्पिर्जलादिभिः ॥ कुंकुमागुरुकर्पूरचंदनैश्च प्रपूजयेत् ॥ हेमादिपुष्प
रत्नानि वासांसि चित्रहतानि च ॥ नैवेद्यं सुप्रदत्तं च देयं देव्यास्स्वभाविते ॥ देवी भक्ताश्च पूज्यंते कन्यकाप्रथ

भीनामलाभेतुभक्त्याभवतिपूजिता॥ कदंबैस्सर्वयेशात्रौमल्लिकाउभयोःस्मृताः॥ दिवावायाणिपुष्पाणिप्यथालाभंप्रपूजयेत्
केशकीटोपविद्धानिशीर्णपर्युषितानिच॥ स्वयंपतितपुष्पाणित्यजेदुपहृतानिच॥ मुकुलीनार्चयेद्देवीमपक्वंननिवे
दयेत्॥ फलंकथितविद्धंवकालापक्वमपित्यजेत्॥ सर्वेषामेवधूपानांदुर्गायोगुग्गुलुःप्रिये॥ घृतयुक्तोविशेषेणास
ततंप्रीतिवर्द्धनः॥ कृष्णागुरुःसकर्पूरोमहामायाप्रियःस्मृतः॥ धूपकल्याणनाम्नातुनित्यंदेव्याःप्रियानृप॥ नासा
क्षिरंध्रसुखदःसुगंधातिमनोहरः॥ दह्यमानस्यकाष्ठस्यधिपतस्येतरस्यवा॥ परागस्याथवाधूपोनिस्तापोयस्य
जायते॥ सधूपइतिविज्ञेयोदेवानांतुष्टिदायकः॥ रागीकृतैर्नवैवस्त्रैर्दृढैःपरिधापयेत्॥ मेदोमज्जासमायुक्तान्न
धूपान्विनिवेदयेत्॥ परकीयास्तथाघ्रातान्स्तेयीकृत्याभिमाक्षितान्॥ पुष्पधूपंवगंधंवउपचाराँस्तथापरान्
घ्राणानिवेद्यदेवेभ्योनरोनरकमाप्नुयात्॥ नभूमौवितवेद्धूपंनाशनेनस्रुतेतथा॥ यथातथावाधृतंकृत्वानावि
निवेदयेत्॥ घृतदीपप्रथमतस्तिलतैलोद्भवस्ततः॥ सार्षपःफलनिर्यासजातोवाराजिकोद्भवः॥ दधिजृम्भ्यात्तज
श्चैवदीपासप्तप्रकीर्तिता॥ हविषाप्रथमःकल्पोद्वितीयश्चौषधीरसैः॥ वसामेदास्थिनिर्यासैर्नकार्यःप्रिस्थिमि
छता॥ नेत्राह्लादिकरंस्वर्वंदूरतापरिवर्जिता॥ स्वशिषःसवदरहितोनिर्द्धनोनतिनिस्वकः॥ दक्षिणेदीपवृक्षस्तु
प्रदीपश्रीसहृद्वये॥ सुवृत्तवर्तिसस्नेहंपात्रभवयूदर्शने॥ प्रदीपवृक्षकोणेतुदीपंदद्यात्प्रयत्नतः॥ लभ्यतेय
स्यतापुरुदीपस्यवत्तरगुल्मात्॥ नसदीपइतिख्यातभोसवह्निस्तुसंभृतः॥ वृक्षप्रदीपोदातव्योनतुभूमौकदाच
न॥ सर्वसहावसुमतीसहतेनहिदद्वयं॥ स्वकार्यपादघातंतुदीपघातंतथैववा॥ नमिश्रीकृत्यदद्यात्तुदीपस्नेहा

मणीयावभूषणैः॥ संपूज्यप्रेषणंकुर्याद्दशम्यांशाबलोत्सवैः॥ अनेनविधिनायस्तुदेवींप्रीणयतेनरः॥ स्कंदवत्पालयेत्तस्तुदेवीस
वा॰तं १०८ र्वोपद्रविस्थितं॥ छत्रदारस्वनर्द्धीनांसंख्यातस्यनविद्यते॥ भुक्त्वेहपरमान्भोगान्प्रेत्यदेवगणोभवेत्॥ बोधयेद्विल्वशाखायांषष्ठ्यां
देवीफलेषुच॥ सप्तम्यांविल्वशाखान्तामाहृत्यप्रतिपूजयेत्॥ पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत्॥ विसर्जनंदशम्यांतुक
र्यात्शावरोत्सवैः॥ कृत्वाविसर्जनंतस्यांतस्यानकंसमाचरेत्॥ अंत्रपादोदिवाभागेप्रणावस्ययदाभवेत्॥ तदासप्रेषणंदेव्या
दशम्यांसावरोत्सवैः॥ वाणिनीभिःकुमारीभिःवेश्याभिर्नर्तकैस्तथा॥ शंखतूर्यनिनादैश्चमृदंगैपटहैस्तथा॥ ध्वजैरस्त्रैर्वस्त्रै
विधैर्लाजपुष्पप्रकीर्तितैः॥ धूलिकर्दमविक्षेपैःक्रीडाकौतुकमंगलैः॥ भगलिंगाभिधानेश्चभगलिंगप्रगीयते॥ भगलिंग
क्रियाभिश्चक्रीडयेयुर्वलंजनाः॥ परैर्नाक्षिप्यतेयस्तुयःपरनाक्षिपत्यपि॥ तस्यक्रुद्धाभगवतीशापंदद्यात्सुदारुणं॥ मूलक्षा
प्यप्रथमवरणेभ्यर्च्यन्तुश्रवणादशमी॥ वासवक्षेविसुजत्यात्॥ मूलेनप्रतिपूजयेद्भगवतींचंडीप्रचंडाकृतिंवाष्टम्यामुपवासस
गततयाभक्त्यासमाराधयेत्॥ नानापाशवमजामांसैरुधिरैःकृत्वानवम्यांवलिंनक्षत्रंश्रवणान्तिथिंचदशमींसंप्राप्यसंप्रेषयेत् गुरुः १०८
नक्षत्रयेवमलादौसप्तम्यामाश्विनेसिते॥ वणिएकामुपहारेश्चपूजयेदष्टमीद्वये॥ कुर्याज्जागरमष्टम्यांनवम्यांविधिवद्बलिं
दशम्यांवलवृद्ध्यर्थंकुर्यान्नीराजनंप्रिये॥ मूलेनबोधयेद्देवींपूर्वेणप्रतिपूजयेत्॥ उत्तरेणार्चनंकृत्वाश्रवणेनविसर्जयेत्॥ ति
थिःशारंतिथिस्वकारणंतिथिःप्रधानंतिथिरेवसाधनं॥ तिथिंविनानैवचदृश्यतेशशीविनेंदुनानैवचकर्मसिद्धिः॥ तिथि
नक्षत्रयोर्योगेद्वयोरेवानुपालनं॥ योगाभावेतिथिर्ग्राह्यादेव्याःपूजनकर्मणि॥ उमायानवमीप्रोक्तादुरस्यातिथिरष्टमी॥ द्वयो
रैक्यंमहापुण्यंउमामाहेश्वरीतिथि॥ अष्टम्यानवमीयुक्तानवम्याचाष्टमीयुत॥ अर्द्धनारीश्वरप्राप्यातिथिःसर्वबुनादिषु॥ प्या
श्विनस्याशितेपक्षपातस्यातिथिरष्टमी॥ तस्यरात्रौपूजनीयामहाविभवविस्तरे॥ योमोहादथवानस्यदेवीदुर्गामहोत्सवे॥ नपू
९

मादयः॥ छिन्नदीनानुपास्वांदानन्न दानेन तोषयेत्॥ नंदभक्तोनवायेत्तमहाव्रतधराश्चये॥ पूजयेत्तान्विशेषेण यस्मात्तद समानितं॥
मातृकाणांच देवानां पूजा कार्या तदा निशि॥ ध्वजछत्रपताकादि उच्छ्रयेच्चंडिकागृहे॥ रजयात्रां बलिंछेपवदुकाख्यपूजनं॥ का
रयेत्तुष्यते येन नृनानाप्रसुनिपातनैः॥ अश्वमेधमवाप्नोति भक्तिनः सुरसत्तमः॥ महानवम्यां पूजयेव सर्वकामप्रदायका
सर्वेषु वन्सवरोषु तव भक्त्याप्रकीर्तिताः॥ कृत्वाप्नोति यशोराज्यंपुत्रायुर्धनसंपदः॥ कन्यायांकृष्णपक्षे तु पूजयित्वाद्रभेदि
वा॥ नवम्यावाधयद्देवीं गीतवादित्तनिस्वनैः॥ शुक्लपक्षेवत्तुर्थ्यातु देवीकेशविमोचनं॥ प्रातरेवत्तु पंचम्यांस्नापयेत्सुशुभैर्ज
लैः॥ सप्तम्यांपत्रिकापूजा अष्टम्यांचप्युपोषणं॥ पूजाचजागरश्चैवनवम्यांविधिपद्बलिः॥ संप्रेषणं दशम्यांतु क्रीडाकौतुकमंग
लैः॥ नीराजनं दशम्यांतु बलिवृद्धिकरं महत्॥ रामस्यानुग्रहार्थाय रावणस्यवधायच॥ रात्रावेव महाकाली ब्रह्मणा बोधि
तापुरा॥ ततस्तुभ्यक्तनिद्रासा नंदयामाश्विने सिते॥ रामा रावणयोर्युद्धं श्लेषमहं साम्पयोजयेत्॥ व्यतीतेसप्तरात्रेतु नवम्यां रा
वणांततः॥ रावणोघोषयामास महामायाजगन्मयी॥ यावत्तयास्वयंदेवी युद्धकौलिमदेक्षतः॥ तावत्तु सप्तरात्राणि सर्वदेवैः
सुपूजिता॥ निहतेरावणेवीर नवम्यां सकलैः सुतैः॥ विशेषपूजा दुर्गाया चक्रेलोकपितामहः॥ ततः संप्रेषिता देवी दशम्यां
वरोत्सवैः॥ तथैव च नरा सर्वे कुर्युः पूजां यथाविधिः॥ वस्त्रनीराजनं राजा कुर्याच्च बलवृद्धये॥ दिव्यालंकारयुक्ताभिः कामिनी
भिः प्रवर्तनं॥ कर्तव्यं गीतवाद्यादि क्रीडाकौतुकमंगलं॥ केशसंस्कारद्रव्याणि प्रदद्यात्प्रातिपद्दिने॥ षष्ठ्यादानं द्वितीयायांके
शसंसयहेतवे॥ दर्पणं च तृतीयायां सिंदूरालक्तकं तथा॥ मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमंडलं॥ पंचम्यायंगरागं च शक्त्यालं
करणानि च॥ षष्ठ्यां बिल्वतरौ बोधं सायं संध्यासु कारयेत्॥ सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत्॥ उपोषणं तथाष्टम्यां
साष्टशक्तेश्च पूजनं॥ नवम्यां उग्रचण्डायां तद्वदेवार्चनं दिवा॥ पूजा च बलिदानं च तत्कृत्वा तु प्रपूजयेत्॥ कुमारीपूजनीयाव भू

हविभवविस्तरैः॥ पूजां समारभेद्देव्या रक्षकर्क्षवारिभे यदि वा॥ पशोघातः प्रकर्तव्यो गवदोजरधस्तथा॥ बलिक्षेपस्तु रक्षेभ्यः कार्यः सर्वा दिशांत
वा॰तं १०९ ये॥ कृन्यासंस्थे रवौ विषेयाश्वु शुक्लातिथिरष्टमी॥ तस्यां रात्रौ पूजितव्या महाविभवविस्तरैः॥ नवम्यां बलिदानं तु कर्तव्यं वै यथाविधि
जपहोमं च विधिवत्कुर्यात्तत्र विभूतये॥ मातृणां चैव देवीनां देवा कार्या तदा निशि॥ हते घोरे महावीरे सुरासुरभयंकरे॥ देवा
उपासकाः देवाः प्रभूता राक्षसास्तथा॥ आगता घातितं दृष्ट्वा महिषं तं सुदुर्जयं॥ ब्रह्माविष्णुसुरेशानाः रुद्र वंद्र यमानिलाः॥ आ
दित्या वसवो रुद्रा ग्रहा नागाः सगुह्यकाः॥ संभूय सर्वदेवास्ते देवीभक्त्या प्रतुष्टुवुः॥ वरं च सर्वलोकानां प्रददौ भयनाशिनी॥ व
र्लिंदुदुश्च तानां महिज्जानिषेनव॥ प्रणेदुः संखभेर्यश्च शमशोथ सूहस्वश्री॥ हताश्च भिनादाश्च पद्दशक्ताः समर्दनः॥ पताका
ध्वजसंछन्नं घंटाचामरशोभितं॥ तद्दिने कारयामासुर्देवीभक्ताः सुरोत्तमाः॥ कृत्वा च सर्वदेवेश्च महापूजा च शाश्वती॥ आश्वि
ने मासि माघान्ते महिषासुरिणि विहिंसिनी॥ देवीं संपूजयित्वाय अर्द्धरात्रेष्टमी सु च॥ घातयन्ति पशून्भक्त्या तेभवंति महाबलाः॥
बलिवधे प्रय छंति सर्वभक्त विनाशनं॥ तेषां तु तुष्यते देवी यावत्कल्पं तु शांकरं॥ क्रीडंति विविधैर्भोगैर्देवलोके सुदुर्लभे॥ ना
धयोभ्याधयस्तेषां न च शक्रभयं भवेत्॥ न च देवग्रहा दैत्या मासुरानवपन्नगाः॥ पीडयन्ति सुराध्यक्ष देवीपादे समाक्षितान्॥ या
वदुर्वायुर्वाकाशं जलं वह्निः शशिग्रहाः॥ तावच्च वरिष्ठका पूजा भविष्यति सदा भुवि॥ प्राकृकाले विशेषेण आश्विनस्याष्टमी सु च॥ गुरुः १०९
महाशब्दा नवम्यां बलोके ख्यातिं गमिष्यति॥ सततं देवराजेंद्र स्वर्गवासफलप्रदं॥ परापराविभागेन क्रियायोगाच्च कीर्तितं॥
इति श्रीवाराहीतंत्रे दक्षिणाम्नाये निर्वाणपदे अष्टाविंशतिपटलः॥ २८ ॥ श्रीभैरव उवाच॥ नवपञ्चात्मके स्थाने पूजा दुर्गां
स्वमूर्तिनः॥ आरोम ध्येतथे प्रादेनवतत्त्वाक्षरैः क्रमात्॥ अष्टादशभुजैः कान्तपीनवक्षस्थलोरुका॥ मूर्द्धजं खेटकं घंटामा
दर्शं तर्जनी धनुः॥ ध्वजं डमरुकं पाशं बिभ्रती वामकैस्ततः॥ शक्तिमुद्गरशूलं च वज्रं खड्गमथांकुशं॥ शरं चक्रं लोक वसतैरवाय

जयतिदंभाद्यद्वेष्याद्याप्यथभैरव ॥ कृष्णाभगवतीतस्य कामानिष्ठानिहंतिवै ॥ परत्रत्वमहामायावलिर्भूत्वासञ्जायते ॥ तस्माद्दे
कहितार्थायसर्वलोकविभूतये ॥ दुर्गातंत्रेणमंत्रेणपूजितस्यउभेअपि ॥ भद्रकालीवोग्रचण्डीमहामायैमहोत्सवे ॥ प्रारुत्तरे
णानस्याच्चदध्यक्षतसमन्वितं ॥ नूतनपल्लवसच्छत्रफलवस्त्रयुगान्वितं ॥ पंचरत्नसमायुक्तंपंचभंगदलान्वितं ॥ स्थापयेद
व्रणंकुंभंवरुणंतत्रविन्यसेत् ॥ गंगाद्याःसरितःसर्वाःसमुद्रांश्चसरांसिच ॥ गजाश्वरथ्यावल्मीकसंगमाक्षदशोकुलान
मृदमानीयविप्रेंद्रसर्वौषधिजलान्वितां ॥ स्नानार्थंविन्यसेत्तत्रयजमानस्यधर्मवित् ॥ सर्वेसमुद्राःसरितःसरांसिवनद
क्रदाः ॥ आयान्तुयजमानस्यदूरतःक्षयकारका ॥ श्रीकाम्यस्तुल्यसम्पेकदेशावृद्धिकरंशुभं ॥ कांचनघृतगोधमान्दूर्वारोचन
यासह ॥ अग्निर्वुसभवानीवगजवक्त्रोमहोरगः ॥ स्कंदोभानुर्मातृगणोदिग्पालाश्चनवग्रहाः ॥ एषांघटेषुप्रत्येकंपूजयि
त्वायथाविधि ॥ मूर्तिपवित्रमेकेकंदद्यादेभ्यःसमाहिताः ॥ कदलीदाडिमीधान्यहरिद्रामानककचू ॥ विल्वाशोकजयंती
चविज्ञेयानवपत्रिका ॥ ब्रह्माणीकदलीकाराद्दाडिमेरक्तचंडिका ॥ धान्यलक्ष्मीर्हरिद्रायांदुर्गामानकपत्रके ॥ चामुण्डा
कालिकाकच्वांशिवाविल्वप्रतिष्ठित ॥ अशोकशोकरहिताजयंताकीर्तिकीस्थिता ॥ तस्मिन्देवीप्रकर्तव्याहैमीवाराजती
तथा ॥ महाक्षीलक्षणोपेताविल्वषष्ठ्यांचपूजयेत् ॥ तत्रास्त्रम्पांभद्रकालीदक्षयज्ञविनाशिनी ॥ प्रादुर्भूतामहाघोरायोगि
नीकोटिभिःसह ॥ अतोर्थंपूजनीयासातस्मिन्नहनिमानवैः ॥ उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः ॥ दीपैर्नैवेद्यैस्तथाभ
क्ष्यैःफलैर्मल्लैश्चधान्यकैः ॥ आमिषैर्विविधैःशाकैःहोमैर्ब्राह्मणतर्पणैः ॥ विल्वपत्रैःश्रीफलैश्चचंदनेनघृतेनच ॥ पशु
भिःपानकैर्हृद्यैरात्रिजागरणेनच ॥ दुर्गागृहेतुशस्त्राणिपूजनीयानिपण्डितैः ॥ वाद्यभांडानिचिह्नानिकवचान्यायुधानि
च ॥ राजोचिह्नशिल्पिभिस्तानिस्वानिपूज्यानिसर्वदा ॥ कन्यास्थरवयश्चैवस्तुकाष्टम्याप्रपूजयेत् ॥ सोपवासोनिशार्द्धेतम

देतावत्तुष्मष्टिश्चयोगिनी ॥ शृणुदेवीप्रवक्ष्यामिचतुःषष्टिकरूपकं ॥ महाभागंविशेषेणधनधर्मसमन्वितं ॥ पूजयेद्विजयादे
वा·तं वींशूलपद्माक्षधारिणीं ॥ शूलाक्षसूत्रवरदामभयंदक्षिणेकरे ॥ भद्रांतुपूजयेद्देवींभद्रासनव्यवस्थितां ॥ नीलोत्पलकराशू
११० लाक्षसूत्रवरधारिणीं ॥ धृतिसंपूजयेद्देवींवराडासनव्यवस्थितां ॥ पद्मदर्पणधारिणींसर्वाभरणभूषितां ॥ शांतिःशांतिप्रदा
कार्यापद्मासनव्यवस्थिता ॥ अक्षसूत्रधरादेवीवरदावामपाणिका ॥ शिवावृषासनाकार्यात्रिनेत्रवृषपाणिका ॥ डमरुरगधा
रिणिसशूलावामयप्रदा ॥ जयामकुटखंडेनुवासुकीकृतकंकणा ॥ क्षमापद्मासनस्थातुप्रतिसर्योपपाणिका ॥ मेखलाशू
लसंयुक्तायोगपट्टोत्तरीयका ॥ सिद्धिचंडासमाकार्यासिद्धार्थकेवलप्रदा ॥ अथपद्मासनस्थातुप्रीतिसर्पोपशोभिता ॥ तुष्टिं
चपूजयेद्देवींकलशोपरिसंस्थितां ॥ पाशांकुशधरांसौम्यांपद्मस्वस्तिकधारणीं ॥ उमापद्मासनाकार्यामृगसिंहपराहता ॥
योगपट्टोत्तरासंगाकमंडलुकराशुभा ॥ वराद्यतत्रिशूलाजपजयाद्यैःपरिवारिता ॥ गहमालाविराजंतीपद्मकुंडलधारिणी ॥
शिवार्चनरतादेवीपुष्टिःकार्यायथाशृणु ॥ खङ्गहस्तामहारूढावर्ममुकुटधारिणी ॥ अश्वारूढास्वरूपाधापुष्टिर्वैवंविधाभ
वेत् ॥ श्रियापद्मासनाकार्यापद्मश्रीफलधारिणी ॥ गजेर्भृहीतकलशैःस्नाप्यमानासुशोभना ॥ ऋद्धिंपूजयपद्मस्थांवरदा गुरु:
भयपाणिकां ॥ दानोद्यतकरांदेवींमाहरतिशुभानिच ॥ वीणावाद्येनपद्मस्थारतिकार्यासुलोचना ॥ दीप्ताचंडासनाकार्याकिर ११०
णोज्वलधारिणी ॥ सिंहासनगदावापिपद्महस्तासुशोभना ॥ नीलोत्पलस्थिताकांतिःकमलोत्पलधारिणी ॥ सुश्यालाभूषिता
देवीसर्वाभरणार्चिता ॥ पर्यंकोदरसंस्थाचयशाकार्यासुशोभना ॥ शंखपुस्तकधारीचसुश्यालाभरणोज्वला ॥ लक्ष्मीःपद्मासना
कार्यापद्मश्रीफलधारिणी ॥ ईश्वरीवृषभस्थातुजटामुकुटधारिणी ॥ चंडार्द्धशेखरादेवीत्रिशूलोरगभूषणा ॥ कलस्थाभवे
द्धिर्वीजपूरकधारिणी ॥ योगपट्टोत्तरासंगरत्नमालाधराशुभा ॥ शाचीगजासनाकार्यावज्रहस्तासुशोभना ॥ जयावतीजीवसं

वैर्युता॥ शेषाःषोडशहस्ता च तर्जनी डमरुं विना॥ रुद्रचंडा प्रचंडा च चंडोग्रा चंडनायिका॥ चण्डा चंडवती चैव चण्डरूपातिचण्डि
का॥ नवमी चोग्रचंडा च मध्यस्था च प्रकीर्त्तिता॥ रोचनाभारुणा कृष्णा नीला धूम्रा च शुक्लिका॥ पीता च पांडुरा रक्ता अतीव स्था
हरिस्थिता॥ महिषोथ महाशस्त्री तत्केवग्रहमुष्टिका॥ स्थाप्या हृत्ते च पत्रेषाव शूलकं स्कंदयामले॥ महिषघ्नि महामाये चामु
ण्डे मुण्डमालिनी॥ कुम्भमारोग्यविजयं देहि देवि नमःस्तुते॥ रूपं देहि यशो देहि भगं भगवति देहि मे॥ पुत्रान्देहि धनं देहि सर्वान्का
मांश्च देहि मे॥ आदौ पृथक् ततः पञ्चमध्ये स्थित्वा च चंडिका॥ पुष्पराप्य हस्तेन शारदां मे विकेत्म ऊं॥ स्थ्रेहि परमेशाने सान्नि
ध्यमिह कल्पय॥ पूजाभागं गृहाणेमं दुर्गे देवि नमोस्तु ते॥ दुर्गे दुर्गे गृहाणाच्छ गणैः परिकरैः सह॥ पूजाभागं गृहाणेमं सर्वरक्ष
नमोस्तु ते॥ नारायणोपविष्टेव चंडिकायै तु धाम च॥ शेषभागे भगायास्मिन चंडीप्रवादयात्॥ दत्वा स्नानमनेनैव कुर्यात्
त्रेणैव पुनः॥ चतुरक्षरमंत्रेण पाद्यादीन थषोडश॥ वितरेदुपचारांश्च पूर्वोक्तांश्चैव भैरव॥ दुर्गा त्रेण मंत्रेण देव्या अंगानि पू
जयेत॥ दुर्गे अनेन हृदये पुन दुर्गे अनेन तं॥ शिखा कवच नेत्राणि बाकु पादाश्च पंचभिः॥ वादिपं वाक्षरैः शेषैः पूजयेत्क्रमसः शु
धी॥ पूर्वभागे मंडलस्य देव्यास्त्राक्षौ च पूजयेत॥ उग्रचंडा प्रचंडा च चंडोग्रा चंडनायिका॥ चंडा च चंडवती चैव चंडरूपा च चंडिका॥
देव्यास्तु करगृह्याणि शस्त्रास्त्रादीनि वाहनं॥ पंचाननकामरं च दैत्यमग्रे च पूजयेत॥ जप्त्वा स्तुत्वा च बलिं दद्यान्नमस्कृत्वा च गु
णं च॥ योनिमुद्रां प्रदर्श्याथ निर्माल्यं दिशि शूलिने॥ चंडेश्वर्यै नमः इति निर्वाप्य च विसर्जयेत्॥ उग्रचंडादिका पूज्या योगिन्य
श्चोत तथा शुभाः॥ योगिनीश्च चतुःषष्टिस्तथा च कोटियोगिनी॥ नवदुर्गास्तथा सर्वदेव्याः संनिहिताः शुभाः॥ जयंत्याद्यागंधपुष्पैः
नादेव्यामर्त्तयेयत॥ देव्याशास्त्राणि चास्त्राणि भूषणानि तथैव च॥ अग्नौ पत्नीयुक्तानि वाहनं सिंहमेव च॥ महिषासुरमर्दि
न्याः पूजयेत्क्रमयसदा॥ ग्रहांश्च दशदिक्पालान पूर्वोक्तेन क्रमेण तु॥ पूर्ववत्पूजयेद्धीमान भैरवं भैरवीमपि॥ दक्षिणे पूजये

वा॰तं
१११

धारिणी॥ रुद्ररूपा तथा रौद्री वृषसंस्था सुशोभना॥ जटामुकुटसार्द्धेन्दुः कृतवासुकिकंकणा॥ रथस्थां पूजयेत्कालीं कपालशूलधारिणीं॥
मयूरी शिखिसंस्था च पाशशक्तिधरा शुभा॥ त्रिनेत्रा चाक्षकर्त्तमा सर्वाभरणभूषिता॥ दंडासनसमारूढे पद्मस्वस्तिक धारिणी॥
स्वरूपां पूजयेद्देवीं हारकेयूरभूषितां॥ शूलचक्रधरा देवी वक्तुरूपा नृसिंहसना॥ त्रिनेत्रां पूजयेद्देवीं शूलपट्टिसधारिणीं॥ जटोरग
शिरश्चंद्रभूषितां शिवरूपिणी॥ रिपुहा शत्रुनाशार्थे वज्रचक्रधनुर्धरा॥ अश्वारूढा तथा पूज्या सर्वाभरणभूषिता॥ अंबिका शू
लशूलाक्षधारिणीं पूजयेत्तथा॥ प्रभासनस्थां देवं चर्चिकां सांप्रतेश्वराम्॥ प्रेतारूढां महादेवीं नागाभरणभूषितां॥ ऊर्ध्वकेशी
करालीं तु मुंडकर्त्रिकधारिणीं॥ सुरपूजिता तु कर्त्तव्या गजारूढा महाबला॥ वज्रांकुशधरा देवी तथा चैव वसतीश्वराम्॥ कापालदण्ड
हस्तां शुभ्रकरास्यां यमासना॥ कौमारी पूज्यते देवि मयूरासनशक्तिभृत॥ त्रिदंडी वानरूपा तु रक्तमाल्यासककुद्ा॥ माहेश्वरी वृषारूढा
त्रिनेत्रा शूलधारिणी॥ वीणावादनशीला च हारकेयूरभूषिता॥ शंखचक्रधरा पूज्या वैष्णवी गरुडासना॥ वनमालाधरा देवी महा
लक्ष्मीस्तथा स्मृताम्॥ गगणोद्भिसि शूलां च नृत्यमालां कपालिनीं॥ सोम्यानना सुसंपूर्णा त्रिनेत्रां मुंडभूषितां॥ तस्यास्तु मस्तकाकार्या
कार्त्तिकी प्रेतसंस्थिता॥ शिवदूती च कर्त्तव्या योवनाभरणोज्वला॥ शिवां वज्रांकुशाधरा निर्मांसा कोटरेक्षणा॥ अविरला तु थेवाष्टावि
केशा नागवधना॥ मुंडालंकृतकर्णा तु वामोरुकरसंस्थिता॥ पीठसंस्थे नयाम्येव तथा ठविकृतानना॥ चामुंडा पूज्यते देवी ऊर्ध्वके गुरु॰ १११
शी भयानका॥ प्रेतासनस्था निर्मांसा मालाखट्वांगधारिणीं॥ कपालशूलहस्ता च कर्णिकाभरणोज्वला॥ मुंडास्थिधरे वास्थे संस्थिता
वामकाङ्गुली॥ गजचर्माशुणा रौद्री नागाभरणभूषिता॥ चतुःषष्ठेस्तु देवानां रूपकं कथितं न च॥ सांप्रतं चसुधाध्यक्ष महाभाग वदा
म्यहं॥ यथा शिवस्य नैवातो विघ्नते देविपूजने॥ तथा चातेन पश्यामि चतुःषष्टेस्तु संयुनान॥ सुवर्णभूमिदानस्य गोदानस्य च यत्फल
फलौति दधि कं देवि चतुःषष्टिस्मृते रिह॥ प्रासादे मंडपे गेहे विचित्रवस्त्रे वलार्थता॥ चतुःषष्टिर्महाभाग पूजिता राज्यदा शुभा॥ चतुः
षष्ठिप्रतिष्ठाप्य धात्रिंशा षोडशाथ वा॥ वसुसंख्यामथा देवि सर्वतरानिरुःकृते॥ मातृणां लक्षणं वक्ष्ये यथावदनपूर्वशः॥ ब्रह्माणी

स्याग्रस्थंगधराशुभा॥ हंसासनाभवेद्ब्राह्मी मुंजमेखलधारिणी॥ चतुर्वक्त्रास्वरूपाधा दंडकाष्ठंकमंडलुं॥ अक्षसूत्रंचबिभ्रा
णास्कंधहस्ताब्जधारिणी॥ योगपट्टकखट्वांगसर्वदोगिरणानना॥ जयंतीनकुलस्थाचकुंडशूलकराशुभा॥ खड्गखेटकराकार्या
वरदाभयपाणिका॥ अपराजितातुकर्त्तव्यासिंहारूढामहाबला॥ पिनाकशरहस्तातुखड्गखेटकधारिणी॥ त्रिनेत्रासर्जटाजूटा
क्रांतवासुकिधारिणी॥ पद्मांकुशकरादेवीअजितामकरासना॥ रथस्थामानसीकार्याघंटामुद्गरधारिणी॥ वज्रांकुशधरीदेवीसर्वा
भरणभूषिता॥ श्वेतापंकजसंस्थातुदण्डाक्षसूत्रधारिणी॥ दितिर्दण्डधराकार्यासर्वाभरणभूषिता॥ फुल्लनीलोत्पलवराउत्संगे
बालकान्विता॥ मायापाशांकुशवरामायावामरधारिणी॥ शूकरस्थामहामायामोहयंतीवरावरं॥ मोहनीमृगयारूढाध्वज
शूलाक्षधारिणी॥ वेणहस्तासुरापात्रहारकेयूरभूषिता॥ लालसागजसंस्थातुमलादर्पणधारिणी॥ ताराकलशमारूढावि
मलाह्वयवर्चसा॥ मुक्ताक्षसूत्रधारीचकमंडलुकलाशुभा॥ गौरीपद्मासनस्थातुवरदाभयपाणिका॥ अक्षसूत्रकरादेवीक
मंडलुधराशुभा॥ शरणासिंहमासीनावरदाभयपाणिका॥ कौशिकीकौशिकारूढात्रिशूलमुण्डधारिणी॥ कपालकर्तिकाहस्ताघो
ररूपामहाबला॥ मतिमनस्थाकर्त्तव्यासर्वाभरणभूषिता॥ वीणावादनसीनावन्द्यमानासुशोभना॥ दुर्गादिशमशस्त्राणिपृष्ठे
गारिपुसूदनी॥ पिनाकशरखर्माद्विधारिणीमहिषापहा॥ नक्षोर्घोत्थमहाकार्यैस्तंभैःपरिवारिता॥ रक्तसूक्ष्मनेत्रैश्चतर्जिता
तूर्ध्वमहान्विता॥ वेष्टितानागपाशेनकेचिकेच्छिगतासनः॥ देवीशूलगताकार्याःसर्वतेसमुखाननाः॥ पादौपद्मासनेचैकमेकमिह
निवेशितं॥ स्वंविधेनरूपेणदुर्गाकार्याभवान्यथा॥ पद्मोपरिसमासीनाक्रियाकार्यासुशोभना॥ पुष्पमालाविराजंतीप्रभामंड
लभूषिता॥ स्रक्वंसुखनधारीचसर्वशोभासमन्विता॥ धृतस्यारुंधतीकार्यापुष्पोदककराशुभा॥ घण्ठातुपूजयेदेवीघंठहस्तां
त्रिशूलिनी॥ कराग्रस्वरूपाकर्त्तव्यासकर्त्तातुसुशोभना॥ पद्माक्षसूत्रधारीचमहाव्रतधराशुभा॥ कपालिनीसराकार्याकपालशूल

वेशयेत्॥ द्विभुजादिव्यवस्त्राणिखड्गखेटकधास्तथा॥ स्त्रिमसुंदरिरूपाचपाशशूलधरापरा॥ धनुर्बाणधराचान्याघंठावक्त्राकरोधता
वज्रदण्डधरादेवीदृष्टावाकुरथापरा॥ कर्तिकामंगलकुंभंकुठारंतर्जनीपुरः॥ डमरुंधारयंतीवशक्तिहस्तामहाबला॥ पद्माभय
बा॰तं करादेवीतर्पयणविंशकेकरे॥ एवंविधस्वरूपातुसिंहस्योपरिसंस्थिता॥ महामायाप्रकर्त्तव्यासिंहयुग्मगतास्थवा॥ पद्मासन
११२ स्थावरदानवयौवनभाविता॥ सर्वावयवशोभाढ्याज्ञयाप्यरूपशोभिता॥ अथवायुध्यमानातुमहिषासुरघातिनी॥ ध्यातव्य
पूजितानित्यंसर्वकामफलप्रदं॥ नतथातुष्यतेदेवीहोमदानजपेनतु॥ कुमारीभोजनेनात्रयथादेवीप्रसीदति॥ पितरोवस
वोरुद्राआदित्यागणालोकपाः॥ शुक्लाष्टमीचतुर्दश्यानवम्यांचविशेषतः॥ कृष्णपक्षेविशेषेणभोजयेत्तुकुमारिका॥ प्र
क्षाल्यपादौसर्वासांकुमारीणांचवासव॥ स्वलिप्तेभूतलेदिव्यतत्रताआसनेस्थिता॥ पूजयेगंधपुष्पैश्चधूपाभश्चापिनना
रमेः॥ पूजयित्वाविधानेनभोजनंतासुधापयेत्॥ खंडलड्डुगुडंसर्पिर्दधिक्षीरंसमाक्षिकं॥ तासांदेयंकुमारीणांसनैर्भोजाप
येच्चता॥ पानीयंयावितंदेयमंचवायावितंशुभं॥ तास्तुप्नासुयदासर्वास्तदास्वाचमनंददेत्॥ आचम्यताक्षतान्सर्वानदत्वात्व
याक्षतंततः॥ दानुःशिरसिरातम्याःकन्यकाभिस्त्वाक्षता॥ तेनापिप्रणिपातंतुकर्त्तव्योभक्तिपूर्वकः॥ अनेनविधिनाश्चैवदे यरु:
वीक्षिप्रंप्रसीदति॥ ददातिविविधान्कामान्मनोभीष्टान्सुराधिप॥ राज्यंकृत्वाततःपश्चाद्देवलोकंचगच्छति॥ प्रभूतवलिदा ११२
नंचनवम्याविधिवच्चरेत्॥ वलिंचयेप्रयच्छंतिसर्वभूतविनाशनं॥ तप्पत्तुतुष्यतेदेवीयावत्कल्पतुशाकरं॥ सर्वभूतविनाशनां
महिषाच्छेदनकलं॥ नवधापशुघातंतुमहिषाज्ञायोविघातनं॥ कर्त्तव्यंभूतवेतालनवम्योनोत्तिकाम्यया॥ पक्षिणःकच्छ
पाग्राहावराहाश्छागलास्तथा॥ महिषोगोधिकासेधास्तथानवविधामृगाः॥ नवविधामृगाक्रूरासारुरुप्रभृतयः॥ ददे
तुष्टोवलिंचैवनिजगात्रासृगुक्षितं॥ सहस्तंतप्तिमायानिस्वदेहरुधिरेनतु॥ तर्पितातिविधिवद्दुर्गाभित्ताबाहुंचजंघके॥

ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा ॥ हंसाधिरूढा कर्तव्या साक्षसूत्रकमंडलु ॥ महेश्वरी स्वरूपेण तथा माहेश्वरी मता ॥ जटामुकुटसंयुक्ता वृष
स्था चंद्रशेखरा ॥ कपालशूलखट्वांगवरदा च चतुर्भुजा ॥ कुमाररूपा कौमारी मयूरवरवाहिनी ॥ रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा मता ॥
हारकेयूरसंपन्ना कृकवाकुधरा तथा ॥ वैष्णवी विष्णुसदृशी गरुडासनसंस्थिता ॥ चतुर्बाहुश्च वरदा शंखचक्रगदाधरा ॥ सिंहासनगता वा
पि बालकेन समन्विता ॥ वाराहीं च प्रवक्ष्यामि महिषोपरि संस्थिता ॥ वाराहसदृशी देवी घंटाचामरधारिणी ॥ गदाचक्रधरा तद्वद्दानवेंद्र
विनाशिनी ॥ इंद्राणीमिंद्रसदृशी वज्रशूलगदाधरा ॥ गजारूढा सुतानंदी लोचनैर्बहुभिर्वृता ॥ तप्तकांचनवर्णाभा वस्त्राभरणभूषिता ॥
तीक्ष्णखड्गधरा तद्वद्योगीश्वरश्शुभा ॥ दीर्घजिह्वा सुरूकेशी मसिखंडैश्च मंडिता ॥ दंष्ट्राकरालवदना कुर्याद्वै च कृशोदरी ॥ कपालमालि
नी देवी मुंडमालाविभूषिता ॥ कपालं वामहस्ते तु मांसशोणितपूरितं ॥ मस्तकं वा शिरोऽन्यस्मिन् शस्त्रिकां दक्षिणे तथा ॥ गृध्रस्था वास
वास्था वा निर्मांसा विगतोदरी ॥ करालवदना तद्वत्कर्तव्यासा त्रिलोचना ॥ चामुंडा बद्धघंटा च द्वीपिचर्मधरा शिवा ॥ दिग्वासा कालिका
तद्वद्रासभस्था कपालिनी ॥ सुरक्तपुष्पाभरणा वर्द्धनी ध्वजसंयुता ॥ विनायकं च कुर्वीत मातॄणामन्तिके तथा ॥ वीरेश्वरश्च भगवान्
वृषारूढो जटाधरः ॥ वीणाहस्तस्त्रिशूली च मातॄणां पुरतो भवेत् ॥ मातरः पूजनीयास्तु दृष्टादृष्टफलार्थिना ॥ गंधनैवेद्यधूपेन
बलिमाल्यविभूषणैः ॥ तथा मातृगणं पूज्य देवं भैरवरूपिणं ॥ स्त्रीसंयुक्तकन्यका विप्राः पूजनीयाश्च शक्तितः ॥ ब्राह्मी माहेश्वरी भ
यः कौमारी वैष्णवी स्मृता ॥ वाराही च तथैंद्राणी चामुंडा सप्तमी मता ॥ अष्टमी स्यान्महालक्ष्मीः प्रोक्तास्तु विश्वमातरः ॥ वरिष्ठं तु श्मशान
स्य योगिन्यष्टौ प्रकीर्तिताः ॥ ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा ॥ कौमारी वैष्णवी चैव वाराही च तथा परा ॥ नारसिंही तथैवं डीशि
वदूती तथाष्टमी ॥ भैरवः पांडुनाथश्च रक्तगौरश्चतुर्भुजः ॥ गदां पद्मं च शक्तिं च चक्रं चापि करेषु च ॥ बिभ्रद्देवाः पुरोभागे पूज्योऽयं
विघ्नरूपधृक् ॥ ममप्रवर्तते पूजा यत्र यत्र च तत्र ते ॥ पूज्यश्चिंत्यस्तथा तत्रैव कायायतव्रतानव ॥ त्रिशूलं दक्षिणो दद्यात् खड्ग
वामे तथोद्धतः ॥ तीक्ष्णधारां तथा शक्तिं वामतोऽपि निबोधत ॥ खेटकं पूर्णपात्रं च पाशमंकुशमेव च ॥ घंटा चापरशुं वापि वामेधः सनि

रुधिरेणाप्यायनामिति ॥ स्थाननियोजयेद्रक्तं शिरश्च सप्रदीपकं ॥ एवं दत्वा बलिं पूर्णं फलं प्राप्नोति साधकः ॥ होमे तु स्याच्छिन्नतायां
निष्फलः स्याद्विपर्ययात् ॥ अन्येषामपि हिंसादीनां बलिना मथ पूजयेत् ॥ कायो मध्ये तमायाति रक्तं गृह्णाति वै शिवा ॥ बलिदाने तु
बा॰तं ११२ दुर्गायाः सर्वत्रायं विधिः स्मृतः ॥ दैत्यानामत्यमांसानि देवीनां पललौदनं ॥ कूष्मांडमिक्षुदंडश्च मद्यमांसं च यच्च वा ॥ एतद्बलि
समाज्ञेयास्तृप्तौ छागसमा स्मृता ॥ चंद्रहासेन कंगारं छेदनं शस्त्रमिष्यते ॥ दात्रासिधेनुकं कवशं कुलाभिस्तु मध्यमं ॥ असि
धेनुच्छुरिशंकुलावर्त्तं तथैव च ॥ कर्तरीक्षुरभागस्त्वधमं परिकीर्तितं ॥ एभ्योऽन्यैः शक्तिशूलाद्यैः बलिच्छेदः कदापि नः
नास्ति देवी बलिं तं तु दानान्मृत्युमवाप्नुयात् ॥ बलिदाने बलिं छित्वा खड्गे स्वरुधिरे शकैः ॥ सर्ववश्यनमंत्रेण ललाटे तिल
कं न्यसेत् ॥ राजा वा राजपुत्रो वा स्त्रियो वा यक्षराक्षसाः ॥ सर्वे तस्य वशं यांति भूतग्रामश्चतुर्विधः ॥ अजानां महिषाणां च मे
षाणां च तथा वधात् ॥ प्रीणयेद्विधिवद्दुर्गां मांसशोणिततर्पणैः ॥ अहन्यहनि यो दुर्गां पूजयेद्रुधिरादिभिः ॥ कुलानां शत
मुद्धृत्य ब्रह्मलोके महीयते ॥ स्वमेकमेक वरदा तत्प्रीभवति चंडिका ॥ रुधिरेणैणस्य हृत्तर्पिता विधिवन्नृप ॥ अजस्य द
श वर्षाणि रुधिरेणास्तु तर्पिता ॥ महिषेण शतं वीर तृप्ता भवति चंडिका ॥ सहस्रं तृप्तिमायाति स्वदेहरुधिरेण तु ॥ तर्पिता वि
धिवद्दुर्गा भक्त्या वा कुर्वजंघके ॥ नरेण शिरसा वीर पूजिता विधिवन्नृप ॥ तृप्ता भवेद्धृशं दुर्गा वर्षाणां लक्षमेव तु ॥ छित्वा भि गुरु॰ ११२
त्वा वृभत्वा निहत्वा सर्वमिदं जगत् ॥ प्रणम्य शिरसा देवीं सपापैस्तु न लिप्यते ॥ दुर्गायादर्शनं पुण्यं दर्शनादभिवंदनं ॥ वंदना
स्पर्शनं श्रेष्ठं स्पर्शनादभिपूजनं ॥ पूजनात्तर्पणं श्रेष्ठं तस्य परा स्वपरा स्मृतं ॥ तर्पणं मांसदानं तु महिषाजनिपातनं ॥ सर्व
यज्ञोपवासेषु सर्वतीर्थेषु यत्फलं ॥ तत्फलं लभते वीर प्रणम्य शिरसा सीं ॥ संप्रसारितदेहो यो दंडवत्पतितो भुवि ॥ चंडिका
पुरतो वीर स याति परमां गतिं ॥ तपतीर्थप्रदानेश्च यज्ञैर्वा बहुदक्षिणैः ॥ न तां गतिं लभते त्रयासुतावसुरेश्वरि ॥ आयुरा
रोग्यसौख्यानि संपदा दयिता स्त्रियः ॥ भवंति तस्य यस्माति देवी वा सव भैरवी ॥ चंडिकां पूजयित्वा तु प्रहृष्टेनांतरात्मना ॥ कृ

Folio (upper)

अजश्च महिषश्चैव नरश्चैव यथाक्रमात् ॥ वलिर्महावलिश्चाति वलिश्चेति प्रकीर्त्तिता ॥ नारेश शिरसा वीरपूजिना विधिवन्नृप ॥ तथा
भूतं भवेद्दुर्गावर्षाणां लक्षमेव च ॥ शोणितं मन्त्रपूतं तु शीर्षपीयूषमुच्यते ॥ तस्मात्पूजमेद ग्रावलेशीर्षवशोणितं ॥ पूजयेद्वि
धिवज्ज्ञात्वा वा मुंडामुंडसमुद्दिनी ॥ रुधिरेणा तथा वीरश्शिरोभिर्विविधैर्नृपः ॥ अजारिमहिषाणां च स्वदेहस्य च भेदनात् ॥ छिन्न
लांगुलकर्णाक्षिभग्नदन्तं तथैव च ॥ भग्नशृंगादिकं वापि न दद्याज्जु कदाचन ॥ काणाश्च गं वापि वृद्धं रोगिणां च गलत्क्षुरं ॥ नो
दत्तो नागमथवा वृद्धलिंगास्त्र वत्सकं ॥ नवत्रैमासिकान्पूनं पशुं दद्याद्विवावलिं ॥ नवत्रैपक्षिकान्पूनं प्रदद्याद्वैष्णतंत्रिणा
पशूनां पक्षिणां चापि नराणां च विशेषतः ॥ स्त्रियं न दद्यात्तु वलिं दत्वा नरकमाप्नुयात् ॥ अलक्तेनापि दद्याज्जुन्तथाज्ञानात्मग
छिजान् ॥ पंचावृद्धलक्षणोपेतं विधिवत्कालिकावलिं ॥ विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत् ॥ उत्तराभिमुखो भू
त्वा वलिं पूर्वमुखं तथा ॥ निरीक्ष्य साधकः पश्चादिमं मन्त्रमुदीरयेत् ॥ नरस्त्वं वलिरूपेण मम भाग्यदुपस्थितः ॥ प्रणामा
मि ततः सर्वरूपिणं वलिरूपिणं ॥ चण्डिकाप्रीतिदानेन नरस्तरपि विनाशन ॥ चामुण्डावलिरूपाय वलेतुभ्यं नमोऽस्तु ते ॥
यज्ञार्थे वलयः सृष्टास्स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोवधः ॥ ऐं ह्रीं श्रीं मिति मन्त्रेणा वलिमे
तस्वरूपिणं ॥ चिंतयित्वान्यसेत्पुष्पं मूर्द्धि तस्य तु भैरव ॥ ततो देवीं समुद्दिश्य काममुद्दिश्य चात्मनः ॥ अभिषिंच्य ततः
पश्चात्कल्तवालं तु पूजयेत् ॥ पूजयेति पुनः प्राह सर्वलोकप्रसाधकः ॥ क्रीं हूं खड्गेति मन्त्रेण ध्यात्वा खड्गं च पूजयेत् ॥ कृ
ष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणं ॥ उग्रं रक्तास्य नयनं रक्तमाल्यानुलेपनं ॥ रक्तांवरधरं चैकपाशहस्तं कुटुंबिनं
पिवमानं च रुधिरं भुंजानं क्रव्यसंहितं ॥ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मपालन
मोऽस्तु ते ॥ पूजयित्वा ततः खड्गं आं कुं फडिति मन्त्रकैः ॥ गृहीत्वा विमलं खड्गं छेदयेद्वलिमुत्तमं ॥ ॐ ऐं ह्रीं श्रीं कौशिकीति

Folio (lower)

बा·तं ११४

स्तुते ॥ सर्वाप्रधमहामात्र सर्वदेवानिसूदन ॥ चापमांसमरे रक्ष शाकंशरवैरिह ॥ धृतं खड्गेन रक्षार्थं संहाराय हरेण च ॥ त्रयीमूर्त्तिगतं
देवं धनुरस्त्रं नमाम्यहं ॥ प्राणान्यात यशत्रूणां मनया तीक्ष्णधारय ॥ गृहाणाजीवितं तेषां कुतस्यैन्यवरक्षमि ॥ शर्मप्रदत्वं समरे च
र्मन्से न्यय शोघनं ॥ रक्ष मां रक्षणी यो हं तापनेयं नमोऽस्तु ते ॥ शशांककरसंकाश हिमदिंडिरपांडुर ॥ प्रोत्सारयन्त्वं दुरितं चामं चाम रव
प्सभ ॥ यथा वुद्धस्रोऽदयन्तः शिवाय मां वसुंधरां ॥ तथा मां छादयच्छत्र युद्धे ध्वनिगतः सदा ॥ शक्रकेतो महावीर्यः स्वपत्नुत्वां सपंडितः
पक्षिराजो वैनतेयस्तथा नारायणध्वजः ॥ काश्यपपयोम्नृतो हर्तो नागारिर्विष्णुवाहनः ॥ अप्रमेयो दुराधर्षो रणे देवानिसूदनः ॥
गरुत्मान्गगरूत्नगतिस्त्वय्येसन्निहितः स्थितः ॥ साध्य वर्मान्मु धान्योधान्यो धान्रक्षात्मकेरिपु ॥ कुतप्रगपस्सवोरुद्रा वायुसो
मामरुर्षय ॥ नागकिंनरगंधर्वा यक्षभूतमहोरगाः ॥ प्रमथाश्च महादेवैर्भूतेशमात्मभिः सह ॥ शक्रसेनापतिस्कंद वरुणश्चाश्रि
तस्त्वयि ॥ प्रतिहन्तुरिपून्सर्वान्राजविजयं च ऋतु ॥ यानि प्रयुक्तान्यरिभिर्दूषणानि समंततः ॥ निहतानि सदानानि भवं तु तव ते
जसा ॥ कालनेमिवधे युद्धे यद्धत्रिपुरघातिने ॥ हिरण्यकशिपोर्युद्धे युद्धे देवासुरे यथा ॥ शोभितासि तथैवाद्य शोभस्व समयं स्म
र ॥ रक्तानीलासिता दृष्टान्तिश्चन्तवाभ्युममारयः ॥ दुंदुभेत्वं सपत्नानां घोषाद्धृदयकंपनः ॥ भव भूमिपसैन्यानां तथा विजयवर्द्धनः
यथाजीमूतघोषेण हृष्यंति वरवारणा ॥ तथास्तु तव शब्देन हर्षोस्माकं जयापहः ॥ यथा जीमूतशब्देन स्त्रीणां त्रासो भिजायते गुह्य ११४
तथा तत्र कृशब्देन तस्मात्स्माद्विषारो ॥ प्रापपत्व शरक्षपणपानाभूतगल्लानां च मंगल ॥ विघ्ननात्वं धृतो नित्यं मतः शांतिप्रयच्छ मे ॥
विजयो जयदो जेता रिपुभेत्ताभयंकरः ॥ दुःखहा शर्मदः शान्तः सर्वारिष्टविनाशनः ॥ इत्यष्टौ तव नामानि यस्मात्त्रिरूपराक्रम ॥ तेन
सिंहासनेति त्वं नाम्ना रादेवषुर्गीयते ॥ त्वयि स्थितः शिवः साक्षात्त्वयि शक्रः सुरेश्वरः ॥ त्वयि स्थिते हरिर्देवं त्वदर्थं नत्पते न तपः ॥ समस्त
सर्वतोभद्रशिवो भवमही पृते ॥ त्रैलोक्यविजय सर्वसिंहासन नमोऽस्तु ते ॥ तु रंगमारिवं जीवं परशास्त्रैव लक्षितः ॥ सदमासमरे रक्ष
स्वामिकार्यसरा कुरु ॥ गन्धर्वकुलजातोसि माभूयाः कुलदूषकः ॥ ब्राह्मणानां सत्यवाक्येन सोमस्य वरुणस्य च ॥ तेजसा चैव सर्वस्य मुनी
नां तपसा तथा ॥ रुद्रस्य ब्रह्मवर्येण पवनस्य वलेन च ॥ प्रभावाच्च हुताशस्य वर्द्धस्व तुरगम ॥ स्मर त्वं राजपुत्रासि कौस्तुभं जमणि

१२

तांजलिपुटोभूत्वा इदंस्तोत्रमुदीरयेत् ॥ ॐ दुर्गांशिवांशांतिकरींब्रह्माणींब्रह्मणःप्रियां ॥ सर्वलोकेप्रणेत्रींचप्रणमामिसि
दाशिवां ॥ मंगलांशोभनांसिद्धांनिःकलांपरमांकलां ॥ विश्वेश्वरींविश्वमयींचंडिकांप्रणमाम्यहं ॥ सर्वदेवमयींदेवींसर्वरोग
भयापहां ॥ ब्रह्मेशविष्णुनमितांप्रणमामिसदाउमां ॥ विंध्यस्थांविंध्यनिलयांदिव्यस्थाननिवासिनीं ॥ योगिनीयोगमाता
चचंडिकांप्रणमाम्यहं ॥ ईशानमातरंदेवीमीश्वरीमीश्वरप्रियां ॥ प्रणतोस्मिसदादुर्गांसंसारार्णवतारिणीं ॥ महिषघ्निम
हामायेचामुंडेमुंडमालिनी ॥ द्रव्यमारोग्यविजयंदेहिदेविनमोस्तुते ॥ भूतप्रेतपिशाचेभ्योरक्षोभ्योश्चमहेश्वरी ॥ देवेभ्यो
मानुष्येभ्यश्चभयेभ्योरक्षमांसदा ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥ उग्रब्रह्माणिकौमारीविश्वरूपेप्रसीदमे ॥
रूपंदेहियशोदेहिभगंवतिदेहिमे ॥ पुत्रान्देहिधनंदेहिसर्वान्कामान्प्रसीदमे ॥ चंदनेनसमालब्धेकुंकुमेनविलेपिते
विल्वपत्रकृतापीडेदुर्गेहंशरणंगतः ॥ इतिश्रीवाराहीतंत्रेदक्षिणाम्नायेनिर्वाणपदेऊनत्रिंशपटलः ॥ २९ ॥ श्रीभैर
वउवाच ॥ दुर्गागृहेतुशस्त्राणिपूजनीयानिपंडितैः ॥ वाद्यभांडानिचिह्नानिकवचान्यायुधानिच ॥ असिर्विशसनःखड्ग
स्तीक्ष्णधारोदुरासदः ॥ श्रीगर्भोविजयश्चैवधर्मधारस्तथैवच ॥ इत्यष्टौतवनामानिप्रियमुक्तानिवेधसा ॥ नक्षत्रंकृत्ति
कातेतुगुरुर्देवामहेश्वरः ॥ रोहिण्यश्चशरीरंतेदैवतंचजनार्दनः ॥ पितापितामहोदेवस्त्वमापातयसर्वदा ॥ नीलजीमूत
संकाशस्तीक्ष्णदंष्ट्रःकृशोदरः ॥ भावशुद्धोमर्षणश्चअतितेजास्तथैवच ॥ इयंयेनधृताक्षोणीहतश्चमहासुरः ॥ तीक्ष्ण
धारायसुधायतस्मैखड्गायतेनमः ॥ सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना ॥ शूलायुधाद्विनिष्कृष्यकृत्वामुष्टिग्रहंशु
भं ॥ चंडिकायाःप्रदत्तानिसर्वदुष्टनिवर्हिणी ॥ तयाविस्तारिताचासिदेवानांप्रतिपादिता ॥ सर्वसत्वांगभूतानिसर्वाशुभनिवारि
णी ॥ छुरिकेरक्षमांनित्यंशांतिंयच्छनमोस्तुते ॥ रक्षांगानिगजान्रक्षरक्षवाजिधनानिच ॥ ममदेहंसदारक्षकट्टारकनमो

भवंतुविजयायते ॥ आखंडमंडलाग्निभगवान्यमनैर्ऋतिस्तथा ॥ वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ॥ ब्रह्मणासहिता
शेषादिक्पालाःपांतुतेसदा ॥ कीर्तिलक्ष्मीधृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिस्तुमातरः ॥
वा॰तं ११५ एतास्त्वामभिषिंचंतुदेवपत्न्यःसमागताः ॥ आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पि
ताः ॥ दत्वादानवगंधर्वायक्षराक्षसपन्नगाः ॥ ऋषयोमानवोगावोदेवमातरएवच ॥ देवपत्न्योडुमानागादैत्याश्चाप्सरसां
गणाः ॥ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच ॥ औषधानिचरत्नानिकालस्यावयवाश्चये ॥ सरितःसागराःशैलास्ती
र्थानिजलदानदाः ॥ एतात्वामभिषिंचंतुसर्वकामार्थसिद्धये इति ॥ ॥ श्रीभैरवउवाच ॥ शृणुदेविप्रवक्ष्यामिप्रायश्चित्तंवि
धिंतव ॥ गुरुत्यागकरःशिष्यःप्रायश्चित्तीभवेद्ध्रुवं ॥ लक्षंश्रीपादुकांजप्त्वातस्मात्पापाद्विशुध्यति ॥ मंत्रत्यागंकरोयस्तु
त्संगंवर्जयेत्प्रिये ॥ लक्षमेकंजपेन्मंत्रंहोमंतर्पणंशुचिः ॥ नित्यादिक्रमदोषाणांशांत्यैविद्याशतंजपेत् ॥ नैमित्तिकांति
क्रमेणसहस्त्रंप्रजपेन्मनुं ॥ मधुलोभाद्यथाभृंगःपुष्पात्पुष्पांतरंव्रजेत् ॥ गुरुर्लब्धास्तथाशिष्योगुरोर्गुर्वंतरंव्रजेत् ॥
यदिदैवात्यशोर्विद्यालभ्यतेकुलजैर्नरैः ॥ द्विजंतुकौलिकंप्राप्यपुनर्विद्यामुपालभेत् ॥ सकलोजीवहीनस्तुसंदिग्धानि गुरु॰ ११५
दिततथा ॥ मनवस्तुनसिध्यंतिगुरुःस्याद्बुद्धघातकः ॥ तदातंसहसाज्ञात्वामंत्रंदेवगुरुंत्यजेत् ॥ क्षमस्वमातस्त्वत्पापंहर
देवीकृपांकुरु ॥ अनेकधापशोरत्तंभुंजतेयत्तुकौलिकाः ॥ लक्षत्रयंजपेत्तापंलक्षंवाप्यजपाजपेत् ॥ होमयेद्धविषाने
नतिःपापःस्यात्तथाध्रुवं ॥ एकपात्रेपिबेद्द्रव्यंवीरोमाहेश्वरोयदि ॥ श्वानोच्छिष्टंभवेत्पापप्रायश्चित्तंसकौलिकः ॥ गायत्र्या
लसहस्रेणउपवासत्रयेनच ॥ सम्यक्साधितविद्यस्तुसर्वांगंगुरवेददेत् ॥ कुलात्स्वरसतोवापियोरमेत्मंत्रमातरं ॥ दशाल
क्षमंतंजप्त्वातुप्रायश्चित्तंसमाचरेत् ॥ मंत्रपुत्रास्वपुत्राश्चभगिन्याश्चकुलस्त्रियः ॥ रमणात्लक्षजापेनपूतोभवतिकौलिकः

स्मर॥ सुरासुरैर्मथ्यमाना क्षीरोदात्समनादभिः॥ जातस्त्वं च भवापूर्वं तेन जातोसि तत्स्मरः॥ यागानि वृस्लहागच्छेपितृहामातृहानतथा॥
भस्मयर्थेनृपवादीवरणोयश्चपरांमुखः॥ स्वर्यांवडमसौवायुयावत्पश्यति दुःकृतां॥ नागानि व्रजसिक्षिप्रंतत्त्वपापंभवेतु व॥ विह्न
तिं यदिगच्छेथा युद्धे ध्वनितु रंगमं॥ रिपूनत्वैजित्यसमरे सह भक्तासुखीभवे॥ शिवाकंकालवेतालाः पूतनाजंभकादयः॥ तेसर्वे
नश्यंयायांतु वलिदानेनतोषिता॥ योज्ञाकारणंगिरिसुताभिरतोददाति वैत्रोत्सवादिदिवसेप्यधिहृर्येनादं॥ वीणासुरेणमधु
रसुस्माधिरीभिः संगीयतेसहितृक्षोदरकिंनरेभिः॥ गीतवाद्यप्रदानेनतसौरव्याप्नोत्यनुत्तमं॥ प्रदक्षिणप्रदानेनरूपवानभि
जायते॥ मासिवाश्वयुतेवीरश्च शुक्लपक्षेत्रिशूलिनी॥ नवम्यांपूजयेयस्तुतस्यपुण्यफलंशृणु॥ अश्वमेधसहस्रस्यवाजपेयश
तस्यच॥ तत्फलंलभतेवीरविविदैवगणोर्हतं॥ अज्ञानामहिषाणांचमेषाणांचतथावधात्॥ वीणायेद्धिधिवदुर्गामासंसोणि
ततर्पणैः॥ उत्तिष्ठदेविचंडेश्रीशुभापूजांप्रगृह्यच॥ कुरुष्वममकल्याणमष्टाभिःशक्तिभिःसह॥ गच्छगच्छपरंस्थानंस्वस्थानंदे
विचंडिके॥ वज्रसोतोजलेन्नहृच्यैतिष्ठगेहेचभूतये॥ ॐ दुर्गेदेविजगन्मातःस्वस्थानंगच्छपूजिते॥ संवत्सरेव्यतीतेतुपुनरागम
नायवै॥ इमांपूजांमयादेवीयथाशक्त्यानिवेदितां॥ रक्षणार्थंसमादायव्रजस्थानमनुत्तमं॥ चतुर्भुजापीतवस्त्रासर्वाभरणभू
षितां॥ दक्षिणवामयोरूपरितलहस्तयोःखड्गचर्मधरांमधस्तनहस्तयोर्वराभयविधात्रिनेत्रांमीषत्स्मितहसितवदनांमपराजितां
वारुणमुखपद्मेनविचित्रकनकोज्वला॥ जयादेविशिवेभक्तासर्वकामान्ददातुमे॥ कांचनेनविचित्रेणभास्वत्कनकमेखला॥
अपराजितारुद्ररताकरोतुविजयंमम॥ इतिश्रुत्वाहरिद्राञ्चपीतांपवारपूजयेत्॥ सरापराजितायस्मात्त्वल्लतासकमातुता॥ सर्वा
कामार्थसिद्धार्थकस्मात्त्वांधारयाम्यहं॥ भवापराजितेदेविममसर्वार्थसिद्धये॥ पूजितायात्वयिभ्रेयोममास्तुदुरितंहृतं॥ ॐ जयदे
वरदेदेविदशम्यामपराजिते॥ धारयामिभुजेदक्षेजललाभाभिवृद्धये॥ वलमाधेहिवलयंमयिशत्रोःपराजयं॥ त्वंधारणाज्ञवे
युर्मेधनधान्यसमृद्धये॥ सुरासुरास्त्वामभिवंदंत्वब्रह्मविष्णुमहेश्वराः॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥ प्रद्युम्नश्चानिरुद्धश्च

देहधर्मसमुपाश्रितः॥ अंत्यशिल्पत्वकर्तव्यात तच्छिष्याद्यैर्विधानतः॥ कर्त्तानित्यक्रियांकर्त्तापंचरत्नैर्विशोधयेत्॥ प्रेतंनेत्रादिमार्गेणालोकांत
रविनिर्गतं॥ आकृष्यस्थापयेत्प्रेतंजीवात्मानंगुरुःक्षितः॥ पंचप्रणवयोगेनवियद्धृषिनिल्लात्मके॥ मोक्षदेपदस्तुग्राय्यवक्षुराद्धि
वा॰तं ११६ समुच्चरेत्॥ प्रेतनामसमुच्चार्यवदेदावाहयामिच॥ अनेनावाहयेत्प्रेतंतत्रप्राणांश्चविन्यसेत्॥ अंगप्रकल्पनंकुर्यान्माययादीर्घ
संयुता॥ प्रतिष्ठाप्यघटंमंत्रीपरेतंस्नापयेत्सुधी॥ पंचगव्यैरयश्रेरणवर्द्धिन्याचाभिषिच्यतं॥ शुद्धतोयेनसंस्नाप्यभस्मनास्नाप
येत्पुनः॥ प्रेतंदक्षिणमूर्द्धानंन्यसेद्दर्भास्तनेसुधीः॥ नववस्त्रस्रगालेपैरलंकृत्यापिभूषणैः॥ अभ्यर्च्यगंधपुष्पाद्यैर्मूलमंत्रेणसा
धकः॥ सम्यक्विमानसंकल्प्यामृतकंतत्राविन्यसेत्॥ ग्रामंप्रदक्षिणीकुर्वन्शंखभेर्यादिनिस्वनं॥ प्रेतस्थानंसमाविश्यदक्षि
णान्तमायतं॥ उपविश्यसमेभूमिंतत्रलाजातिलाक्षतान्॥ विकिरेत्सर्षपोपेतान्विमानमथविन्यसेत्॥ संस्थाप्यतत्रवित्यभि
परिस्तीर्यविलोमतः॥ पात्राणपासादयेन्मंत्रीदक्षिणेविह्निदेवतं॥ प्रणीतपात्रमासाद्यसंपूज्यकुसुमादिभिः॥ दर्भैराछादितं
मंत्रीवह्निकोणेप्रविन्यसेत्॥ दक्षभागेयजेद्देवंभैरवंमंडलक्रमात्॥ उक्तेनविधिनाकृत्वावह्नेर्जिह्वादिकल्पनं॥ तिलतंडु गुरुः
लसंमिश्रंश्चवयवरुमुत्तमं॥ मृत्युंजयेनमंत्रेणशतमष्टोत्तरंस्रुचीः॥ सावेनवरुणंकृत्वापंचरत्नविशेषतः॥ जुहुयात्मूलमं ११६
त्रेणक्रमादावरणानितिकं॥ सर्वंविलोमताहोमात्सर्वमंत्रान्गुरोस्तनौ॥ क्रमेणविलयंनीत्वाजुहुयाद्वारविभेनव॥ कृत्वाथ
मूलमंत्रेणप्रेतदेहेविलोमतः॥ तत्वानिविलयंनीत्वासर्वमात्मनियोजयेत्॥ पुराणपापेपरेतस्यजुहुयान्मंत्रमुच्चरन्॥
ततःपूर्णाहुतिंदत्वायोजयेत्परमेपदे॥ शिवशक्त्यात्मकेशुद्धेपरानंदेद्विवर्जिते॥ सच्चित्सुखमयेसाक्षान्नत्वागीतेनिराकले
इतिसंयोजितःप्रेतःशिष्येनपरमेपदे॥ संपूज्यमलकालुष्यंशससंभावायकल्प्यते॥ आज्येनजुहुयाद्धूमवयोराष्ट्रेणमूलतः
अनुलोमविधानेनप्रायश्चित्तायसाधकः॥ परेतदेहमग्निनाशयनंपरिकल्पयेत्॥ वह्नेर्दक्षिणदिग्भागेकुलवृक्षसमुद्भवैः॥

मंत्रपुत्रीपुत्रत्वेनस्युपदेशोभिधानतः ॥ कृत्वावीरवधंमंत्रीतृषापानंगुरोर्गृहे ॥ मंत्रपत्नींवीरपत्नींरक्षितांलक्षमाजपेत्
अनस्थिप्राणसंघातंहत्वावनरकंव्रजेत् ॥ हत्वाचपक्षिणःसर्वान्स्त्रियंवैकादशजपेत् ॥ सर्पमार्जारनकुलमूषमंडूकखरेह
यं ॥ गजाश्वमृगान्सर्वान्हत्वाचाष्टशतंजपेत् ॥ जपेदष्टसहस्रंतुक्षुद्रजंतुवधेकृते ॥ वलिदानंविनामंत्रीपानंयन्त्रपशून्
क्वचित् ॥ अन्यथास्मार्त्तमुदितंप्रायश्चित्तमशोभि ॥ गोवधेदशभिर्लक्षैर्मुच्यतेनरकार्णवात् ॥ लक्षैर्द्वादशभिर्मंत्रीनृपंह
त्वाविमुच्यते ॥ गुरुंहत्वाप्रमादेनपंचलक्षैर्भवेच्छुचिः ॥ दशभिःकोटिभिर्मंत्रीस्त्रीवधात्प्रविमुच्यते ॥ नकाशीर्षायनपापपीठ
क्षेत्रपरिभ्रमात् ॥ प्रमादात्पतितेविप्रेक्षणंविंशतिभिःशुभिः ॥ क्षेत्रादयोयथोक्तेनमुच्यतेकिल्विषादिनः ॥ ब्राह्मणस्यवधेलक्ष
क्षत्रियेद्विगुणंस्मृतं ॥ वैश्येत्रिगुणमुद्दिष्टंपादजेचचतुर्गुणं ॥ अर्हद्बौद्धवधेमंत्रीखड्गिलक्षमनुंजपेत् ॥ वभ्राश्वभूकराणांच
वधेपंचसहस्रकं ॥ पक्षिणांहननेमंत्रीद्विसहस्रेणशुध्यति ॥ सर्पमार्जारमत्स्यानांवधेवेदसहस्रकं ॥ देवद्रोहीगुरुद्रोहीत्रि
शत्कोटिमनुंजपेत् ॥ निंदतेसमयानांचयोगिनीवीरयोःशिवः ॥ शास्त्राणांमंत्रिणांस्वाणांसहस्रंजपमाचरेत् ॥ वामदक्षिणा
सिध्यन्तेशैवव्रतधरेहते ॥ चतुःकोटिमितंमंत्रीजपन्शुध्यन्तिकिल्विषात् ॥ आद्यादिनिदनेमंत्रीदशावर्तेनशुध्यति ॥ अर्घाम्
तंपिवेत्यर्वदेवीमस्थापयेत्ततः ॥ पशुपानभवेत्स्यन्तस्ययालक्षतोभवेत् ॥ वीरपत्नीतृषापानंवीरपत्नीशुषेत्लप ॥ प्रायश्चि
त्तंचरेन्मंत्रीदिव्यवीरार्चनादिकं ॥ दीपनाशेपात्रनाशेपात्रप्रस्खलनेतथा ॥ पूजयित्वामहादेवींजपेदष्टोत्तरंशतं ॥ अज्ञानाद्यदितु
छिद्रंज्ञात्वातद्विगुणंभवेत् ॥ भग्नेवस्फुटितेयंत्रेहतेचौरेणवाप्रिये ॥ उपवासंप्रकुर्वीतदिनमेकमतंद्रितः ॥ लक्षमात्रंजपेद्विधा
होमतर्पणपूर्विका ॥ सञ्ज्ञात्वागुरुंतोष्यवृषस्नाणानपिभोजयेत् ॥ कस्यविध्वर्भविहवास्फटितादिविभवणं ॥ भग्नंकरोतियोमं
त्रीमृत्युस्तस्यभवेत्ध्रुवं ॥ तस्मात्सर्वतीर्थराजेवागंगादिसरितावरे ॥ समुद्रेवाक्षिपेद्देवीमन्यथादुःखमाप्नुयात् ॥ आर्विकेयोयदामंत्री

वा॰तं ११७

वेत्तोयोनयोषित्सुकदाचन ॥ नमासोयोषितांचात्रनध्यानंनचपूजनं ॥ केवलंजपमात्रेणमंत्राःसिध्यंतियोषितां ॥ पुरश्चर
णकालेचपरशक्तिंप्रपूजयेत् ॥ दीक्षितोवस्त्रपुष्पाद्यैर्भोज्येपायससंभवैः ॥ अन्यगेहेसमानीयअर्घोदकंविशोधितं ॥
अमृतीकरणंकृत्वाशक्तीरभिमुखंनयेत् ॥ अर्घोदकेनसर्वास्ताःसंप्रोक्ष्यविधिपूर्वकं ॥ अमृतीकरणंकुर्यात्सफलीकरणं
ततः ॥ अथाष्टकन्यकावक्ष्येदेवीरूपधरायतः ॥ ब्राह्मणीक्षत्रियावैश्याशूद्राचकुलभूषणः ॥ वेश्यानापितकन्याचरजकी
योगिनीतथा ॥ विशेषवैदग्ध्ययुताःसर्वस्वच्छभागगाः ॥ अष्टकन्यारूपभेदंविलोक्यामर्षवेष्टितं ॥ ब्राह्मण्याद्यष्टशक्ती
नांनामभिःकृतसंज्ञकः ॥ गोरक्षक्ष्मादिकंरूपंसौम्यत्ववर्णादिकं ॥ आसनंप्रथमंदत्वास्वागतंचवदेत्पुनः ॥ अर्घ्यंपा
द्यंचपानीयंमधुपर्कंजलंततः ॥ स्नापयेद्गंधपुष्पाद्यैःकेशसंस्कारमाचरेत् ॥ धूपयित्वाततःकेशान्कोशेयंविनिवेदयेत् ॥
ततःस्नातोत्तरेपीठमास्तीर्यपादुकाद्वयं ॥ दत्वातत्रसमासीनांनानालंकारभूषणैः ॥ भूषयित्वातत्रलेपंचगंधमाल्यंनिवे
दयेत् ॥ तांताशक्तिसमावाह्यमूर्द्धितासांसमानयेत् ॥ भोज्यमंडपमध्येतुस्वर्णपात्रेसुशोभने ॥ चव्यंचोष्यंलेह्यपेयंभोज्य
वैवहिभक्षकं ॥ अदीक्षितायदास्यंतुतदामायानिवेदयेत् ॥ तत्रासांसव्यकर्णेषुततःस्तोत्रंसमाचरेत् ॥ मातर्देविनमस्तेस्तु
ब्रह्मपुत्रिवरेनघे ॥ कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे ॥ माहेश्वरवरदेदेविपरमानंदरूपिणी ॥ कृपयाहरविघ्नंमेमंत्र
सिद्धिंप्रयच्छमे ॥ कौमारीसर्वविघ्नघ्नीकुमारक्रीडनेवने ॥ कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे ॥ विष्णुरूपधरेदेविविनान
सुतवाहिनी ॥ कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छमे ॥ वाराहिवरदेदेविदंष्ट्रोद्धृतवसुंधरे ॥ कृपयाहरविघ्नंमेमंत्रसिद्धिंप्रयच्छ
मे ॥ शक्ररूपधरेदेविशक्रादिसुरपूजिते ॥ कृपयाहरमेदेविमंत्रसिद्धिंप्रयच्छमे ॥ महालक्ष्मिमहामोक्षक्षोभसंतापनाशि
नी ॥ कृपयाहरमेदेविमंत्रसिद्धिंप्रयच्छमे ॥ मितिमातर्मयेदेविमितिमातर्विहित्वान्ते ॥ एकैवतुंतरेदेविविश्वरूपेनमोस्तुते ॥

गुरु॰ ११७

शंखभिर्दक्षिणाग्रैस्तु बिल्वैर्वा कुवैस्तथा ॥ आस्तीर्य शयनं मंत्री त्रिगुणीकृततंतुना ॥ संवेष्ट्य पूजयेदों च पुष्पाद्यैरुपचारकैः ॥ आच्छाद्य
नववस्त्रेणा तत्र यंत्रं लिखेत्सुधीः ॥ पद्मं त्रिकोणाग्रकोणाकर्णिकं शास्त्रपत्रकं ॥ सार्द्धरेखेन तस्मात्र पुष्पमारोपकीयेत्सर्वतः ॥ प्रेतं दक्षि
णमूर्द्धानं विन्यसेदिह साधकः ॥ रक्षामंत्रेण संकल्प्य ज्वालामालिनिविद्यया ॥ प्रज्वाल्याघोरमंत्रेण दहेत्यातादितो बुधः ॥ अघोराख्ये
णा मंत्रेणा मंत्री पाशुपतेन वा ॥ यावद्भस्मी भवत्येष तावद्धोमं करोत्विह ॥ स्तोत्रमंत्रजपं कुर्यात्समयज्ञाः समागताः ॥ भस्मीभूते परे
तस्मिं देवान्सम्यक्तमर्चयेत ॥ चितामग्निं रक्षयेन्मंत्री संप्राप्ते सप्तमे हनि ॥ निर्वापयस सास्थीनि वेष्टयेद्धनवाससा ॥ तत्क्षणे निःक्षिपे
त्क्वापि विशुद्धे सलिलाशये त ॥ अस्थि कूटं खतेन्मंत्री देवमातृगृहे थवा ॥ स्वगृहे वा नियम्यैत त्रिसंध्यं पूजयेदिदं ॥ पूर्वं पूजाम्नतद्दिने
प्रतिमा सप्रकल्पयेत ॥ संपूर्णवत्सरे कुर्यान्महोत्सवमतंद्रितः ॥ ततोस्थि कृतस्मछत्पनया वा विधिसंस्पृशि ॥ निःक्षिपेन्निखनेत्क्वापि वि
शुद्धे धरणीतले ॥ केनापि कीकसेनास्य प्रतिमां पादुके थवा ॥ कृत्वास्य पूजयेन्मंत्री गुरुभक्तिपरायणः ॥ देशांतरमृतानां च जीवताम
पि साधकः ॥ दर्भपुंजैः पलाशैर्वा शालिपिष्टेन वा पुनः ॥ देहं कृत्वा यथा पूर्वं दाघं कुर्याद्विचक्षणः ॥ अथ वा मनसा कुर्यादेकांते स्वयमा
त्मिकः ॥ वाग्भवदीपिनी ज्वालामालिनीति पदं ततः ॥ क्रोधसंपुटतत्पराणं संपुटत्वेन योजयेत ॥ एतानि तत्र बीजानि प्राणबीजं विकेशवे
हसेंदुगान्कुटिलं वह्निं बिंदुभगाश्रितः ॥ शिवशक्तिक्षमं द्राव वह्निवानाधिसचयं ॥ ज्वालामालिनि मंत्रोयं कथितो मंत्रकोविदैः ॥ माया
बीजं स्फुरद्वय प्रस्फुरद्वितयं ततः ॥ घोरघोरतरे भ्यंते तनुरूप पदं वदेत ॥ चटप्रचटद्वितयं कथितो यमहासनः ॥ कहकहसमच्चयेघात
यद्वयमच्चरेत ॥ बंधंस्वाहा समुद्दिष्टो वर्णाम घोरमंडकः ॥ तारिणीप भुवरातिकववावाक्षरो वदेत ॥ मनुपाशुपतास्त्रोयं क्षत्रयद्द
निवारकः ॥ पंचांतकेंदुपाश्वार्णान्यमधांतसमन्वितान ॥ रुद्रारुवानुस्थीः कुर्याद्वामकर्णेदुसंयुतान ॥ पंचरत्नमिदं प्रोक्तं मनोभिलषि
तप्रदः ॥ इति श्री वाराहीतंत्रे दक्षिणाम्नाये निर्वाणपदे त्रिंशपटलः ॥ ३० ॥ भैरव उवाच ॥ कुरुक्षेत्रे प्रयागे च गंगासागरसंगमे ॥ महाका
लेचकाश्यां वरोपस्थानेन चिंतयेत ॥ पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे ॥ यदि कुर्यात्पुरश्चर्यां तत्र कूर्मं न चिंतयेत ॥ नियमः पुरु

पायेन देवेश देहशुद्धिः प्रजायते ॥ तन्मे कथय सर्वज्ञ यदि स्नेहोस्ति मां प्रति ॥ ईश्वर उवाच ॥ देवेशि भक्तिसुलभे औषधं कथयामि ते ॥ नव्र
काष्ठमिदं क्वापि त्रिषु लोकेषु दुर्लभं ॥ कुमारीस्तन्यधारीवराजमार्गेण पेषयेत ॥ एकवर्णगवाक्षीरे रंभावीजेन मे वच ॥ प्रभाते लेप
येद्देगे वत्सपसिद्धिः प्रजायते ॥ श्वेतापराजितामलं सघृतो सह भक्षयेत ॥ श्वेतकुष्टविनाशं च लेपयित्वा रवेर्दिने ॥ अशोकस्य फलं पु
ष्पं मेरंडस्य फलं सह ॥ निमंत्रयेत्सर्वदिने भक्षयेदपरे हनि ॥ वानाजीर्णभवरोगस्तस्य देहे न जायते ॥ द्वादशाधारमारोप्य तत्कृते
परिभेदयेत ॥ ननोजपेन्महाविद्यां वाक्पतिर्जायते नरः ॥ वादेसदसिया वाक्यसंभिनी प्रतिवोदिनी ॥ तत्पंडितघटाटोपतनोप्रभ
हतप्रभ ॥ सत्तर्कपदवाक्यार्थशब्दालंकारसारवित ॥ जिह्वायांन्यसनादेवमूकोपि सुकविर्भवेत ॥ सुकुमारतरस्फारशब्दालंकार
सारवित ॥ ततोद्भुतसमुद्रोस्मिमालानुल्येरुपन्यते ॥ पदगुंफैर्महाकाव्यं वरकारपितामवेत ॥ अम्याहतामतिशास्त्रे विजयो वाक्
नेरिव ॥ बालकस्य तु जिह्वायां त्रिदिनाभ्यंतरे लिखेत ॥ सुवर्णस्य शलाकिन्या मधुनाभ्रे तदु वेया ॥ वाग्भवाद्यालिखेद्विद्यां समारा
ध्य प्रजाप्यव ॥ सस्त्वपण्यितस्मीमान्नमूर्खः करावन ॥ एतद्वागीश्वरी विद्यां वारिशशस्यापि मूर्द्धनि ॥ करदत्वा जपेद्विद्यां शतमष्टोत्तर
नरः ॥ सोपि श्लोकान्नशोधाख्य करोति वाक्यनिर्यथा ॥ जिह्वायां भावयेद्यस्तु तारिणीं पर्सनिभां ॥ बृहस्पतिसमस्तस्य कदिनाभुक्त
निर्जिता ॥ ब्राह्मेमुहूर्ते वोत्थाय कृतावश्यकसंयुतः ॥ जिह्वायां भावयन्विद्यां तेजोरूपां जपेत्सुधीः ॥ अमृतसंदितीतस्य वाणी सर्व
विधा भवेत ॥ प्रातर्विद्यां विभाम्यैव जिह्वायां दीपरूपिणीं ॥ मातृकासहितां विद्यां त्रिरावर्त्य जलं पिवेत ॥ जलपानविधानेनम
कोपि सुकविर्भवेत ॥ जिह्वायां चिंतनादेव त्रिकालज्ञो भवेन्नरः ॥ यस्तु विद्यां भेदेन चिंतयेत्साधकोत्तमः ॥ जीवन्मुक्तोपि स
कश्च भवेत्सोपि भवेद्ध्रुवं ॥ मधुना तर्पणाद्देव्याः सर्वकामफलप्रदं ॥ अष्टसिद्धिकरं साक्षान्महापातकनाशनं ॥ हविष्याशी स
नकेशोजपेच्यतमादरात ॥ गद्यपद्यमयी वाणी तस्य सर्वविधा भवेत ॥ शतानि भजन्नमात्रेण रोरवन्नानि लकंनरः ॥ कृत्वापञ्च
नियमंत्री तत्कुर्याद्दास्यवत्क्षणे ॥ पक्षराजपालेलगाढयेषिकाच्छतमोग्रह ॥ दतेनानीयतं गर्भकीलकेन नकारयेत ॥ तेनैव मधुनो

एतत्स्तोत्रंपठेद्यस्तुमंत्रारंभेषुसंयुतः॥विरुग्धांवासमालोक्यनस्यविघ्नंनजायते॥यदिक्रीडापरात्मास्तुभोजनेनतुहाहृदि॥
स्थितस्तोत्रंपठेत्तावद्यावत्तृप्तिप्रजायते॥आचम्यमुखवासादितांबूलंचनिवेदयेत्॥ततोदद्यात्पुनर्माल्यंवंदनंपंक्तिनंभु
भं॥विसृज्यप्रदक्षिणीकृत्यवरंप्रार्थ्यसुखीभवेत्॥ज्योतिपश्यतिसर्वत्रशरीरेवाप्रकाशयुक्॥निजंशरीरमथवादेवतामय
मेवहि॥क्रूरकर्मसुदेवेशिकर्मकृत्वायथाविधि॥तैलाभ्यक्तःपुनःस्नातःसोगाशावरणायुधः॥अभ्यर्च्यदेवतासिद्धामात्मरक्षा
र्थमेत्रिजे॥जपेत्मंत्रंप्रसन्नात्मासहस्रंशास्त्रकंप्रिये॥मांरक्षरक्षयेत्युक्त्वाप्रणाम्यविसर्जयेच्छिवे॥अन्येसुहृद्भिःसुस्निग्धैरात्म
रक्षांतुकारयेत्॥मृत्युंजयादिभिर्देवीप्रयोगास्त्वेणवाशकृत॥जपहोमार्चनाध्येष्यब्राह्मणाराधनादिभिः॥प्रयोगातेतथावक्र
पूजामंत्रीसमाचरेत्॥एकलक्षंजपेन्मंत्रीध्याननामाससमन्वितः॥प्रयोगदोषशात्यर्थमात्मरक्षार्थमेवच॥नचेत्तफलमाप्नो
तिदेवताशापमाप्नुयात्॥प्रणावाद्यामुक्तिकरीश्रीबीजाद्यायनागमे॥हृल्लेखाद्यामहासिद्धिकरीसर्ववशंकरी॥वाग्भवाद्यावर
द्वियांकामाद्याजमरंजनी॥ऊर्ध्वदृष्टिर्जपेच्छांतावधोदृष्टिस्तुमोहने॥समदृष्टिःस्तंभनेचपार्श्वतोदर्शनक्रमात्॥विरोधेवसमु
च्चाटमारणोस्तर्यदर्शनः॥विद्यार्थंजलमध्यस्थोभानुमंडलदर्शनात्॥क्रममध्यदर्शनादेविसर्वत्रशुभकर्मणि॥नित्यंजपकरेकु
र्यात्प्रयोगेकरावन॥प्रयोगविहितामालातत्कर्मानुरूपतः॥होममुद्रात्रयप्रोक्तमृगीहंसीचसूकरी॥सकुरीकरसंकोचामृगी
मुक्तकनिष्ठिका॥हंसीस्यात्तर्जनीमुक्ताविधाशप्रकीर्तिता॥शांतिकेपौष्टिकेचैवमारणोच्चाटनेतथा॥विद्वेषस्तंभनेचैवच
रुपवपरमेश्वरि॥शांतिकेचमृगीज्ञेयाहंसीपौष्टिककर्मणि॥अभिचारेभूकरीस्याद्विद्वेषोच्चाटनादिषु॥नदेवाप्रतिगृह्णतिमु
द्राहीनामथाकृतिं॥मुद्राहीनातुयामोहस्त्वेतामिच्छतिमंदधीः॥वश्यशांत्योःस्वर्णपात्रंमत्यात्रंस्तंभनेमतं॥विद्वेषेखादिरंपा
त्रमुच्चाटलोहनिर्मितं॥मारणेकुकुंडस्यान्यात्राणामानितर्पणे॥देव्युवाच॥भगवन्सर्वतत्वज्ञलोकानुग्रहकारक॥केना

तस्मादेविन्यसेन्मंत्रंसर्वकामफलप्रदं॥मातृक्रोडेतुसंस्थाप्यदर्भानास्तीर्ययत्नतः॥शांतिंकुर्याद्बालकस्यसाधकैःसहसंयु
तः॥मातृःसव्येतुकर्णेचपूर्वस्तोत्रंसमाचरेत्॥बालीभयावचावासापिप्पलीमधुसंयुताः॥अस्यप्रयोगात्सप्ताहात्किंनरैः
बा॰तं ११९ सहगीयते॥देव्युवाच॥जिह्वामार्जनकंडंयंस्त्वाभिरक्षावकीदृश॥पुत्ररक्षावकिदेववेश्मरक्षाकिमौषधं॥श्रोतुमिच्छा
म्यहंदेवकथ्यतामनुग्रहात्॥ईश्वरउवाच॥कृष्णाजयंतीपुष्पंचअपामार्गस्यमूलकं॥लेपयित्वाचजिह्वायांषष्ठेचदि
वसेसुतं॥रक्षाद्रव्यंवजातीयाद्यजन्मदिवसेकृतं॥विप्ररारुपभमूलभुश्कगोमंडमेवच॥स्थापयेद्द्वारदेशेचनालिकि
ञ्जयंतदा॥जंबुत्वचंशिविपत्रंजटानांधारयेच्छिरे॥राक्षसानांभयंनास्तिरोगहृत्यादिकंतथा॥चतुःकोणेतुगेहस्यरोप
यित्वातुपिप्पलं॥वहिसस्थापयेद्द्वारेवध्वायाच्छागलकपि॥रंभामूलद्वयंरोहेषष्ठेचदिवसेन्यसि॥तत्रैवस्थापयेत्खड्ग
ब्राह्मणंचसुशोभनं॥कृष्णांस्त्रियंप्रतिष्ठाप्यमृणालंवाविनयान्वितं॥जयंत्यासुरसेनैवकुमारस्नापयेत्ततः॥जयंतीघृतयो
गेनचोदकेनवसिचयेत्॥अष्टपत्रेप्रतिष्ठाप्यसुपुत्रोमतिमान्भवेत्॥नागेश्वरस्यमूलंचवत्सचमानीप्रयत्नतः॥पूर्णांकृत्वा
घृतारूचवर्तिकाकारयेत्ततः॥दीपंकृत्वातुमंत्रज्ञःपुत्रनाडीतुदेख्येत्॥सुविनीतोभवेत्पुत्रोमेधावीचगुणान्वितः॥स्थाप गुरु॰
येद्द्वारदेशेचअशोकदक्षिणात्वचं॥एतानिस्थानेद्रव्याणिजंबुन्वचसलोकं॥यःसदास्थापयेद्द्वारेतस्यविघ्नविनाश ११९
नं॥निशाभागेत्रयोदश्यांपूजयित्वातुनारिणी॥अर्कत्वचंकरेधृत्वास्पर्शयेन्नारिणीशिवां॥कामसिद्धिःप्रयत्नेनलभते
नात्रसंशयः॥यात्मूलंकरेधृत्वायःस्मरेन्नारिणीमनुं॥त्रयोदश्याविशेषेणसर्वकामफलंलभेत्॥कृष्णकेनारमारेचप
रमानंददायिनी॥संसारेदुःखरेघोरेत्राहिमांपरमेश्वरि॥सर्वपापविनाशाचसर्वपापविनाशिनी॥त्रिकालाज्ञानरूपेच
त्राहिमांपरमेश्वरि॥ॐनमःचंडिकादेवीनमस्तेयममातरी॥पंचनद्यास्थितानित्यानित्यमध्वरवासिनी॥गजमुखःवा

केनपृष्ठिपत्रमात्रके॥ लिखेद्धज्ञावलीमध्येमूलमंत्रंतुसिद्धिदं॥ अमुकंकुरुमायांतेवदेत्साधकसत्तमः॥ तत्तुंडेवतुरस्रेतुनिःक्षिप्यगुरु
पादुधि॥ सहस्रलक्षीरनीरक्तपद्मामालोहितांचिषं॥ प्रणवंपूर्वमुच्चार्यपद्मेयुगलमेवच॥ महापद्मेपदंब्रूयात्पद्मावतिपदंततः॥
ॐॐस्वाहेतिमंत्रेणयथापूर्ववलिंहरेत्॥ स्वयंकुरुतेकर्मसंस्याद्भुतकविश्रुवं॥ अर्द्धरात्रेततोनित्यंवलिंदद्याच्चतुःपथे॥ प्रण
वंपूर्वमुच्चार्यहृल्लेखांचततःपरं॥ स्फजटेपदांतेतुमहाशब्दमुदीरयेत्॥ पक्षाधिपदमाभाष्यमतस्यतनोममः॥ उपनीतपदं
वोक्त्वावह्निलिंगंततितिष्ठद्विधा॥ गृह्णापयद्विधाठोक्तासमस्तंपदंततः॥ शांतिकुरुयदंदेवपरविद्यामनंतरं॥ द्विधाद्धंकृत्वातिष्ठ
ब्रूयात्क्रटद्विधीतिवह्निधा॥ मायास्वाहेतिमंत्रेणवल्यादौवुद्धिसिद्धिदः॥ परसैन्यग्रहारिष्टरोगकृत्याविनाशनः॥ प्रयोगंव
लिमंत्रोयंप्रयोगान्साधयेयदि॥ अर्द्धरात्रेगतेनित्यंवलिंदद्याच्चतुःपथे॥ परसैन्यग्रहारिष्टरोगकृत्याविनाशनः॥ प्रणवंपू
र्वमुच्चार्यवाग्भवारेततःपरं॥ विकटदंष्ट्रेपरपक्षक्षोभयद्वयमुच्चरेत्॥ खादयद्वयपदमथतथाछेदयद्वयंवदेत्॥ यमांहि
सितुमुधेनातथानिंदितुमुधता॥ योगिनीवक्रसहितेसत्यानाशायहुंफट्स्वाहा॥ परविद्यामाकर्षयछेदयस्वाहाकपिलेग
हूंस्वाहा॥ अथवामधुलाजाभ्यांजिह्वायांबालकस्यच॥ नाडीछेदात्तदापूर्वंलिखेद्धेमशलाकया॥ मूलमंत्रंलिखेन्मंत्रीय
द्वेस्वाभ्येतुदूर्वया॥ वाक्योवाररणतोबालोवाग्मीद्रुतकविर्भवेत्॥ जन्मसंस्कारेकुसद्यःपुत्रोजातेप्रशस्यते॥ जिह्वायांतुलिखे
न्मंत्रीयत्तदारुशलाकया॥ वारत्रयंतुसंपूज्यदक्षिणेनैवपाणिना॥ मंत्रमुच्चार्यप्रत्येकंपंक्तिंकुर्यात्सुशोभनं॥ आदौकृत्वातु
संस्कारांउदंतेविलिखेन्मनुं॥ गंधवदनपुष्पैश्चपूजयेत्तारिणीशिवां॥ उत्तराभिमुखोभूत्वास्थापयेत्तीर्थसत्तमं॥ पूजयेत्ता
रिणीदेवीनानाभक्ष्यैःसुशोभनैः॥ कविर्वाग्मीभवेत्पुत्रःसत्यवादीजितेंद्रियः॥ कुशमूलेनमधुनालिखेन्मंत्रंप्रयत्नतः॥ पि
तुर्भ्राताथवामंत्रंमातुर्भ्राताथवाप्यनः॥ पितावाविलिखेन्मंत्रंनान्यस्यकदाचन॥ अथभ्राताप्रशस्तश्चअग्रजश्चभवेत्सदा

योगेश्वरिस्रवंदिता॥ कृष्णाष्टमीचतुर्दश्यांवाष्टमीवज्रमंडला॥ कपालसंस्थितादेवीनरकंकारसंकुले॥ रक्तपात्रवसामेदुमत्स्यमांस
वलिप्रिये॥ महाभैरवसंयुक्तानमामिजयभैरवी॥ क्षेत्रेपीठेमहापीठेगुह्यासीप्रेतासनी॥ कामाक्षीकामरूपीत्वंमोहमायाति
बा॰तं रंजना॥ दुःखशोकजरामारीभयपातकनाशिनी॥ खड्गसिद्धिकरीदेवीलक्ष्मीश्रीशुभदायिनी॥ पथितंभक्तिभावेनयेपठंतिस्तु
९२० तिमानराः॥ कामसिद्धिफलंप्राप्यशुभगानंददायिका॥ भैरवउवाच॥ नमोस्तुवीरचामुंडेनमोस्तुपरमेश्वरी॥ जननीसर्वभूतानां
सर्वसंरक्षकारिणी॥ चंडमुंडसमाकीर्णवरदांगीमनासनी॥ नानारूपधरादेवीभूरागीसोमरूपिणी॥ पीनस्तनीविशालाक्षी
सर्वाभरणभूषिता॥ मुक्ताकनकमाणिक्यकुंडलामुकुटधारिणी॥ नतुसुग्मदिव्यकेयूरंमुक्तास्रग्दामसोभनी॥ नानारत्नानिवं
धंतेमेखलाकटिबंधने॥ हस्तयोदर्पसर्वांगनानाप्रहरमर्दिता॥ भैरवीरूपसंकाशारक्ताक्षीभीरविक्रमा॥ निर्जनीअरिहंतारि
सर्वशत्रुक्षयंकरी॥ नानाशस्त्रधरीदेवीनानाशास्त्रसुरेश्वरी॥ अष्टादशभुजारौद्रीनानाशास्त्रासुरेश्वरी॥ परशुपाशगदाचक्राभिं
दिपारश्चतोरणा॥ शक्तिनानावगादीचत्रिशूलाश्चलधारिणी॥ खड्गफटकसंधारीकर्त्तरीकर्त्तधारिणी॥ त्वंदेविसर्वभूतानामने
काकामरूपिनी॥ दाद्याध्यात्मस्वरूपत्वंसर्वज्ञाजीवरूपिणी॥ ऊर्ध्वकेशमुखोभीमाभैरवाकारनादिनी॥ सूर्यरश्मिरवाकीर्णास गुह्य॰
र्वदोषप्रणाशिनी॥ चतुष्पीठचतुर्वृक्षेश्मशानेचत्वमेवच॥ पद्मासनसमारूढापद्मिनीचक्रनायिका॥ क्षितिजलाचपातालेपंच ९२०
भूतत्वमेवच॥ इडापिंगलाश्चैवदशवानादरूपिणी॥ नाभिकंठेहृदिस्थानेबुलरंध्रेप्यवस्थिता॥ मूर्ध्निस्थानेमहाज्ञानेममृ
तामृतरूपिणी॥ कुलमध्यस्थितादेवीज्ञानमध्यरूपिनी॥ भुक्तिमुक्तिप्रदेदेवीसर्वज्ञारुद्रनायिका॥ ब्रह्मेंद्रविष्णुदेवेंद्रेनई
श्वरेशिवसंस्थिता॥ नागेंद्रयक्षगंधर्वासर्वदेवमनोहराः॥ वत्सारोलोकपालानांसर्वत्रैलोक्यमातरा॥ अथयोगमनयश्चैवदा
नवासुरपूजिता॥ हाहाहारावमहाघोराअट्टहासामहाबला॥ वामहस्तेमहाशंखंखट्वांगडमरुधारिणी॥ अट्टाट्टहासनेनित्यं

मकुटंवस्कदंतत्रिलोचन ॥ गणेशंविघ्नसंहारंगंगासुतंनमोस्तुते ॥ प्रणाम्यब्रह्माणीदेवीकनकांगीमन्तासनी ॥ चंद्रांतश्री
चतुर्मुखीहंसवृक्षेवरगामिनी ॥ नागकुंडलभूल्लास्वकपालचंडेश्वरी ॥ विभक्तावसमाक्रीडाविशेषभयवाधिनी ॥ नमस्तेयोगिरुद्रा
णीत्रिनेत्रवृषभवाहिनी ॥ पद्मरागतनुर्वायसशस्त्रसूर्यसमप्रभा ॥ शक्तिहस्तामलंकालीकौमारीमयुरासनी ॥ विभक्तावसमाक्रीडा
विशेषभयनाशिनी ॥ शंखचक्रगदापाणिजयन्तीगरुडासनी ॥ रक्तवेशपटाटोपकर्णहस्तत्रिलोचनी ॥ दंष्ट्रावदनवाराहीनमा
मिमहिषासनी ॥ जातरूपीस्वरूपीच सौम्यरूपीनिमित्रता ॥ नमस्तेश्वरसेंद्राणीवज्रहस्तगजासना ॥ वराभयधरीवज्र
शक्तीचत्रिलोचनी ॥ अग्निप्रभेमहाकालाश्रुक्षांगीकमलासनी ॥ पंचभूतेश्वरीदेवीनिर्मलेत्तानरूपिनी ॥ नमस्तेस्तु
महालक्ष्मीनिर्विघ्नशुभकारिणी ॥ चंडिकाचामुंडिकादेवीचर्चिकाचंडेश्वरी ॥ सर्वसिद्धिकरीसर्वसर्वविघ्नविनाशिनी ॥ पाशा
कुशशक्तिहस्तभ्रूलखट्वांगधारिणी ॥ दहनीमालिनीवरणिदानवादर्पनासनी ॥ रुरुवरक्तकेशारीरक्ताभरणभूषिणी ॥ द्वा
दशादित्यसंकाशांमलक्ष्मीमल्लनाशनी ॥ दुर्गतारीउग्ररूपीरुरणांत्रैलोक्यकारिणी ॥ डाढभासुरवमुरवज्वालामुंडमालास
माकुले ॥ जयजगन्मातरौदेवीनमस्तेत्रिभुवनेश्वरी ॥ नरवर्मधरीदेवीमाघ्रचर्मनिवासिनी ॥ कपालभरभूषांगीसुरापा
णविलासिनी ॥ डमरुवाटकंयंत्रघंटानेचवभूषणी ॥ साडंवरीअरुकाराप्रचंडप्रेतवाहनी ॥ नानाशास्त्रसमाकीर्णा
फेफकारमहारवा ॥ त्रैलोक्यत्रासनीरौद्रीप्रचंडीप्रेतवाहनी ॥ कल्पाग्नीरसमाकालीज्वालाभरणभूषणी ॥ चंडिमुंडी
चचांडली संग्रामेजयमंगलं ॥ जालंधरेओडियानदेवीकोटनिवासिनी ॥ नानारूपधरादेवीनमस्त्रैलोक्यपालनी ॥ मु
खोज्वालागंडलेखालललाटसिंदूरधारिणी ॥ डाकिनीभूतवेतालीपिशाचायानवस्तनी ॥ देवदानवगंधर्वायक्षकिन्नर
पूजिता ॥ गंधचंदनलिप्तांगीपुष्पमालाविभूषणी ॥ वटुकनाथमहाकालक्षेत्रपालसमायुता ॥ श्रीमच्छक्तिश्चसंयुक्त

लश्रधारिणी ॥ वृषवाहनीमहादेवीमहालक्ष्मीनमोस्तुते ॥ ब्रह्माणीमाहेश्वरीदेवीकौमारीवैष्णवीतथा ॥ वाराहीइंद्रचामुण्डाम
हालक्ष्मीगणेश्वरी ॥ अनेकदेवतारूपीत्वंदेवीकालरूपिनी ॥ भैरवीअष्टसंयुक्तेभैरवीचनमोस्तुते ॥ जयधूम्रश्चसिंहस्थैनै
वा॰तं १२१ ऋत्यावारुणेतथा ॥ वायव्याचोत्तरेभागेईशानेचनमोस्तुते ॥ अधऊर्ध्वस्त्वयादेवीअंतरिक्षेजलेभुवि ॥ त्वंशक्तिशक्तिसंधारी
शक्तिरूपीनमोस्तुते ॥ प्रणाम्यशक्तिसंयुक्तंसततंयोगिनीकुला ॥ क्रियाकुर्वंतियोगिन्यभवच्छेदकुठारक ॥ यःपठेत्स्तोत्रविधि
नामेकचित्तसमाहितः ॥ भुक्तिमुक्तिप्रदंदिव्यंलभतेनात्रसंशयः ॥ श्मशानेवाप्रवासेवास्वस्थानेवावनांतरे ॥ संग्रामेघोर
संस्थानेअग्निदाहेमहाभये ॥ यस्मापठतेनित्यंजयोभवतिमानवाः ॥ येर्चितंतत्फलंदिव्यंलभतेधामनांशुभां ॥ इत्युक्तेन
चपुराणेनसर्वसत्वासुखावह ॥ मातापितानश्चसर्वाश्चभविष्यतिशिवप्रदा ॥ भैरवउवाच ॥ वाराहीसुंदरीकालीसुंद
रीवदनाशुभा ॥ सौम्यरूपाचसौम्यस्थासर्वसौभाग्यदायनी ॥ वामाचारलतादेवीवामाचारसुपूजिता ॥ पूजितासुभगादा
त्रीसौम्यरूपितमोस्तुते ॥ महिषासनमारूढामहिषासुरघातिनी ॥ त्वयास्तुतिनजानामिक्षम्यतांपरमेश्वरी ॥ सिंहस्था गुरु: १२१
सौम्यरूपाचसिंहासनफलप्रदा ॥ राजमातास्त्वमेकालीराज्यैश्वर्यप्रदायनी ॥ त्वमेवजननीकालीवाराहीचनमो
स्तुते ॥ रनेराजकुलेद्यूतेसर्वत्रविजयोभवेत् ॥ यस्त्वंपठितस्तोत्रंसर्वान्कामानवाप्नुयात् ॥ जवापुष्पसहस्रेणानी
लोत्पलसहस्रकं ॥ जपित्वापूजिताकालीप्रत्यक्षचंडिकाभवेत् ॥ इतिवाराहीतंत्रेदक्षिणाम्नायेनिर्वाणापदेशएकत्रिंशपटलः

अघोरा घोररूपिणी॥ श्मशाने क्रीडिते नित्यं भैरवी भैरवसह॥ गृध्रकाककशिवाश्वानपिशाचागनराक्षसा॥ डाकिनी रुद्रवे
तालाश्च योगिनीगणमंदिता॥ कपालमालिकादेवी कपालवरधारिणी॥ रक्ताम्बरप्रिया नित्यं जगत्संहारकारिणी॥ अ
नेकनामसंपन्नामनेकाममनायका॥ नानारूपाग्निनामानि वकुरूपा नमोस्तुते॥ भगवति चण्डिका दुर्गा भवानी व्योमरूपि
णी॥ कालिकाकालदंडी च कात्यायनि नमोस्तुते॥ वेदमति विशालाक्षी गायत्री गांडमादिनी॥ सावित्री शोभनी चंडी भूवप
श्चा वसुंधरा॥ जया च विजया श्चैव अजिता चापराजिता॥ नंदा भद्रा स्तथा पूर्णा उमादेवी नमोस्तुते॥ गौरी जामुक्षगंगा च शिवा
निशिवरूपिनी॥ भुवनेश्वरी चंडिका श्चाशी गंधर्वा त्रिभुवनेश्वरी॥ प्रज्ञाधरी विधाना च सृष्टिसंहारकारिणी॥ जंभनी स्तंभनी श्चै
वसुमुखी भयपारगा॥ मोहनी वर्विका चण्ड हंसिनी नादरूपिनी॥ अनेकज्ञानसंशोधिकालिनी कुलनायका॥ षडक्षरी भद्र
काली वेदनी लसरस्वती॥ मातंगी कालिका श्चैव हरालक्ष्मी नमोस्तुते॥ मनोनेत्रा त्रिपुरा त्रिपुराभैरवी स्तथा॥ भूत्यना
भवसंधाती भावाभावविवर्द्धिनी॥ अनेकमंत्रसंस्थाने मंत्रांगानेकरूपिनी॥ चतुर्भुजहंससमारूढा चतुर्मुखा हेमरू
पिनी॥ पितामही वेदमाता ब्रह्मायणी नमोस्तुते॥ नमामि शिरसा देवी त्रिशूलाभूलधारिणी॥ त्रैलोक्यमोहनी देवी मा
हेश्वरि नमोस्तुते॥ शक्तिहस्ता महाकाया मयूरासनसंस्थिता॥ वारभावेकरस्कांगी कौमारी च नमोस्तुते॥ चतुर्भुजा गरुडा
रूढा शंखचक्रगदाधरी॥ गौरवर्णा महामाया वैष्णवी च नमोस्तुते॥ दण्डहस्ता महाकाया भीषणा श्च विभीषणी॥ त्रि
नेत्रा रौद्र घोराक्षी वाराही च नमोस्तुते॥ कुंजरासनमारूढा सहस्राक्षी वज्रधारिणी॥ अनेकरिपुहन्तारि ऐन्द्रायणी नमो
स्तुते॥ प्रेतासनी महारौद्र मुण्डमालासुशोभिनी॥ ऊर्द्धकेशी च केकाली चामुण्डा च नमोस्तुते॥ दिग्वांगी चंद्रसंहारी त्रिशू

वा॰नं॰ गांब्रुक्रमः स्याचेत्र थनिर्वपणादिषु॥ यद्वा देवान्स्वचां ब्रह्माजुहुयात्स्रुवाहुतिम्॥ यन्मुखां स्वस्वहेडयं होमकर्त्रे दत्तातितत्॥ यजमानस्तु
१२२ गुरुश्चा ब्रह्मा भवेत्स्रुवाहुतिः॥ कस्मिंश्चिद्ब्रह्मणाय स्मिन्पक्षे द्रव्येदत्तानितत्॥ होतवैका ऋत्विश्चात्र व्याहृत्याविः समुच्चयात्॥ प्रायश्चित्ते हु
ते पश्चाद त्रीन मपि कर्मवै॥ कार्यमिस्येक आचार्यानेत्य स्येतु विपश्चितः॥ जपहोमहास्वेतेन्मुगादिव्यरूपिणः॥ पवित्ररूह स्तस्पविडवं
तिदिशोदश॥ चकल्पे वास्त्व ऋसोकं यस्य कर्म प्रचोदितं॥ तस्याता वन्निशास्वार्थक्रतेसर्वहुतो भवेत्॥ सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशी
र्षकः॥ त्रिपास्प्रसन्नवदनः सुखासीनः शुचिस्मितः॥ स्वाहां तु दक्षिणे पार्श्वे देवी वामे स्वधां तथा॥ बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुवं स्रु
चं॥ तोमरं व्यजनं वामेघृतपात्रं तु धारयन्॥ आत्माभिमुखमासीन एवंरूपो हुताशनः॥ यस्य स्मृत्या च नामोक्त्या ततो यस्क्रियादिषु॥ स्व
नं संपूर्णतां याति सद्यो वंदे तमच्युतं॥ पावको लौकिको ह्यग्निः प्रथमः संप्रकीर्तितः॥ अग्निस्तु मारुतो नाम गर्भाधाने विधीयते॥ ततः पुंस
वने ज्ञेयः पवमानस्तथैव च॥ सीमन्ते मंगलो नाम प्रबलो ग्रान कर्मणि॥ नाम्ना वै पार्थिवो ह्यग्निः प्राशने तु शुचिः स्मृतः॥ सत्यो नाम स्वचौले
तु व्रतादेशे समुद्भवः॥ गोदाने सूर्यनामाग्निर्विवाहे योजको मतः॥ आवसथ्यो द्विजो ज्ञेयो वैश्वदेवे तु रुक्मकः॥ प्रायश्चित्ते विपश्चैव पा
वकपत्ते शुपावकः॥ देवानां हव्यवाहश्च पितॄणां कव्यवाहनः॥ शांतिके वरदः प्रोक्तः पौष्टिके बलवर्द्धनः॥ पूर्णाहुत्यामनिलो नाम क्रोधा रामः १२२
ग्निश्चाभिचारके॥ वश्यार्थे कामदो नाम वनदाहे तु दूषकः॥ क्रव्यादो जाठरो ज्ञेयः क्रव्यादो मृतदाहके॥ वह्निनाम लक्षहोमे कोटिहोमे तु
नाशनः॥ समुद्रे नाडवो ज्ञेयः क्षये संवर्तकस्तथा॥ ब्रह्मा वै गार्हपत्यश्च ईश्वरो दक्षिणस्तथा॥ विष्णुराहवनीयः स्यादग्निहोत्रेत्रयोग्न
यः॥ शास्त्रैव मग्निनामानि गृह्यकर्म समारभेत्॥ सर्वे सप्तद्वाः सरितस्तीर्थानि जलदान दाः॥ आयान्तु यजमानस्य दुरितक्षयकारकाः॥ देव

भैरव उवाच ॥ पवित्रं यदि नश्येद्वै तस्मात् पवित्रं वनेत् वस ॥ यदा हविरपक्वं स्यात्तेनैव हविषा यजेत् ॥ वन्हुः शरावमात्रेण पचेद्धी हि निरोदनं ॥ भो
जयेत्तेन चान्येन वनुरोगा सरगान्यथा ॥ वहु दग्धं च पक्वं तत् किंचिदेव यथा हवि ॥ छिप्टेन छा पुनर्यागः स्यादारत्यादिन सदा ॥ हुन्त दग्धं
यदा तस्मात् पुनरुत्यादयेद्धवि ॥ स एव योगः कर्त्तव्यः पुनर्योगस्तु नेष्यते ॥ मध्यात् पूर्वाद्धतो वर्त्रे यदि दुष्टं हविर्भवेत् ॥ तस्यैव हविषा व
ह्नेर्मध्यात् पूर्वार्द्धनः पुनः ॥ इध्माधाने कृते दुष्टं प्रधानहविरत्र येत् ॥ तत्स्थाने जुहुयादाज्यमदुष्टं च जुहोत्सथ ॥ एवं समापयेद्दुष्टं तदप्सु
प्रक्षिपेत्पुनः ॥ अन्वाधानादिको यागः पुनः कर्त्तव्य एव तु ॥ प्रागिध्माधानतो दुष्टं प्रधानहविषिन्वथ ॥ तद्धविः पुनरुत्पाद्य पूर्ववत्त
त्समापयेत् ॥ अंगानां चेद्धविर्दुष्टं तदप्सु प्रक्षिपेत्पुनः ॥ स्वष्टकृद्धविदोषस्य आज्येनैव समापयेत् ॥ प्रच्युते स्तु न खेः केशैः कीटैर्वा मेध्य
मेविभिः ॥ वसासृक्वच्छुक मज्जास्थि मूत्र विट् स्वेदद्रुषकैः ॥ श्लेष्माधैरपि वीभत्सैर्दुष्टानि स्युर्हवींषि चेत् ॥ भिन्नानि वै वल्मिकाभिर्दुष्टानि स्युः
क्षिपेज्जले ॥ पर्वतायाजीश्वपातेन कुर्याद्धोमं न चैव तत् ॥ समानतन्त्र कुर्वीत पार्वणे तान्नु कर्मणा ॥ कृता प्रयाणो श्रीयात्र वात्रयस्तु
चैनतः ॥ वैश्वानराय कर्त्तव्यं श्वरुः प्राग्हविस्त्रुवा ॥ द्विप दत्रं यदाभ्रके तत्राप्येष चरुर्भवेत् ॥ सपात्रदसमिन्नाशे पुनराधेयमिष्यते
श्रोतो न मविरोक्षणमव्रणानुशान शान्तिदं ॥ प्रायश्चित्तं विशेषस्य यत्र नोक्तो भवेद्विधिः ॥ होमस्या घ्याहुति लत्त्र भूर्भुवो स्वरिही हुतं
निमित्तानन्तरं सर्वं प्रायश्चित्तं भवेदिह ॥ प्रागेवो त्पथने दोषश्चाज्यसंरक्षारतो यदि ॥ प्रायश्चित्तं भवेदाज्यसंस्कारानन्तरं तदा ॥ य
क्रमेदि वतानीनु संकल्पादौ भवेद्यदि ॥ मंत्रारातं व्युत्क्रमस्तद्योमादौ न भवेद्यदि ॥ मध्यात् पूर्वाद्धतस्त्रीति व्युत्क्रमोस्य भवेद्यदि ॥ इध्मा

 रंजीवतु बालकः ॥ बालेनयेनविद्धं ते शैलभंगसमुच्छ्रितं ॥ हृष्टेनैकेन हस्तेन तद्बलं स्यात्तु ते मम ॥ शांतिरस्तु शिवं चास्तु भक्षाश्च पत्र्य भं च येत् यः
 समागतेश्चायं तत्रैव प्रतिगच्छतु ॥ चंडार्कयो दितीशानां यमस्य च भवस्य च ॥ निक्षेपभिवमय्यातं ते मे रक्षंतु कलकं ॥ अत्र — — प्रमत्तं
वा दिवा रात्रौ तथापि वा ॥ रक्षंतु सर्वतः सर्वे देवाः शक्रपुरोगमाः ॥ आयुर्वेदोक्त मंत्रेण रक्षां वालसमीप ठेत् ॥ नागाः पिशाचा गंधर्वाः पित
रो यक्षराक्षसाः ॥ यथेत्वाभिभवंति स्य ब्रह्मा ताः हंतु सर्वदा ॥ पृथिव्यामंतरिक्षं च ये रक्षंति निशाचराः ॥ दिदिक्षु दिक्षु ये चान्ये त्वा रक्ष
तु जनस्ततः ॥ पांतु त्वां ऋषयो देवाः शस्ता राजर्षयस्तथा ॥ पर्वताश्चैव नद्यश्च तथा सर्वे च सागराः ॥ अग्नि रक्षतु जिह्वायां प्राणान्वायु
स्तथैव च ॥ सोमो व्यानं चपानं ते पर्जन्यः परिरक्षतु ॥ उदानं विद्युतः पातु समानं स्तनयित्नवः ॥ वलमिंद्रो वलपतिर्वा चं वा च मतिस्तथा॰
कामांस्ते पातु गंधर्वाः सत्वमिंद्रोभिरक्षतु ॥ प्रज्ञां ते वरुणो राजा समुद्रो नाभिमंडलं ॥ चक्षुः सूर्यो दिशः श्रोत्रं चंद्रमाः पातु ते मनः ॥ ना
सिकां पातु ते वायुरोमाणि ओषधयस्तथा ॥ आकाशं त्वरिशे पातु देहं त्वं वसुंधरा ॥ वैश्वानरस्तव शिरो विष्णुस्तव पराक्रमं ॥ पौरुष पुरुषः
श्रेष्ठो ब्रह्मा पादौ तथा ध्रुवो ॥ एते देहविशेषाणां तव मित्या भवन्विह ॥ एतद्वेदोक्त मंत्रैस्तु कृत्वा व्याधिविनाशनं ॥ मये वं कृतरक्षस्त्वं दीर्घ
मायू मा प्नुहि ॥ ब्रवीठस्वस्ति ते विछः स्वस्ति ते नारदाद्दय ॥ स्वस्ति चाग्निश्च वायुश्च स्वस्ति देवा महोरगाः ॥ पितामहकृतं स्वास्ति स्यायुः
कूर्वंतु ते सदा ॥ निर्वाणं निर्विकल्पं निरूपममलं निर्विकारं सकोपं चक्रं दंडं दधानं तन्वदनेहद्रवन्मंत्रभावं प्रकृत्या रावह्यरार्वभ्र
कुटितटप्रखं भैरवं भूलपाणिं खद्वांगैः कोटिभीमं डमरुकसहितं क्षेत्रपालं नमामि ॥ नानारूपधराः सर्वे गंधर्वा देवयोनयः ॥ स्वयं रक्षं
तु मे पुत्रं तुष्टा गृह्णन्तु मे वलिं ॥ आदित्याद्याग्रहाः सर्वे नित्यं स्वर्गनिवासिनः ॥ रक्षां कुर्वंतु मे सर्वे स्वयं गृह्णंतु इमं वलिं ॥ दिक्पालाश्च तथेन्द्रा

दानवसंवादेमथ्यमानेमहोदधौ॥ उत्पन्नासितदात्वंभविष्णुनेविष्णुनास्वयं॥ तत्रोयसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः॥ त्वयितिष्ठति
रूपानित्वयिप्राणाःप्रतिष्ठिताः॥ शिवंस्त्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः॥ आदित्यावसवोरुद्राविश्वेदेवाःसपन्नकाः॥ त्वयिति
ष्ठन्तिसर्वेपियतःकामफलप्रदाः॥ त्वत्प्रसादादिमंयत्नंकर्तुमीहेजलोद्भव॥ सान्निध्यंकुरुदेवेशप्रसन्नाभवसर्वदा॥ स्फुरत्पद्मासना
देवींमर्द्धपद्मासनस्थितां॥ सर्वालंकारशोभाढ्यांपीनोन्नतपयोधरं॥ सदामृतप्लवंतीञ्चपीतकौशेयवाससां॥ चतुर्भुजांदक्षिणोन्न
स्थूलदंडचविभ्रती॥ वामेनचोर्द्धहस्तेनदधतीनीलोत्पलंशुभं॥ वामदक्षिणहस्ताभ्यांगृहीतविविधायुधां॥ आयाहिवरदेदेविमहा
षष्ठीतिविश्रुते॥ शक्तिभीरक्षमेदेविमहषष्ठीनमोस्तुते॥ जयदेविजगन्मातर्जगदानंदकारिणी॥ प्रसीदजयकल्याणीनमस्तेदे
विषष्ठिके॥ षष्ठिदेविमहासत्वेसर्वेषांवसूत्प्रदे॥ वरदेत्वत्प्रसादेनचिरंजीवतुबालकः॥ देवतानामृषीणांचभक्तानांभक्तवत्सले॥
शमंचरक्षमेपुत्रंषष्ठिदेविनमोस्तुते॥ गौर्याःपुत्रायथास्कंदःशिशुःसंरक्षितस्त्वया॥ तथाममाप्ययंबालोरक्षतांषष्ठिकेनमः॥ षष्ठिदेविन
मलुभ्यंसूतिकागृहशायिनि॥ पूजिता--रंभक्त्यासवालांरक्षमातर॥ जननीसर्वभूतानांवर्द्धिनीधनसंपदां बोधिनीसर्वविद्यानांजन्मदेत्वंनताव
यं॥ जननीसर्वलोकानांबालानांचविशेषतः॥ नारायणीस्वरूपेणास्तुतेमेरक्षसर्वतः॥ शक्तिस्त्वासर्वदैवानांबालानांहितकारिणी॥ मते
वरक्षमेपुत्रंमहाषष्ठिनमोस्तुते॥ रुद्राणीरुद्ररूपेणसर्वविघ्नविनाशिनी॥ ब्रह्माणिदेविरक्षबालंशुभदाभवसर्वदा॥ खड्गेममकुलोत्पन्नंर
क्षत्वमिहबालकं॥ रक्षोभूतपिशाचेभ्योडाकिनीयोगिनीषुच॥ मातेवरक्षमेबालंशापदेपत्रगेषुच॥ चमेववैष्णवीदेवीब्रह्मा
णीचव्यवस्थिताः॥ रुद्रशक्तिसमाख्यातामहाषष्ठीनमोस्तुते॥ धात्रीत्वंकार्त्तिकेयस्यमहाषष्ठीतिविश्रुते॥ त्वत्प्रसादादविघ्नेनचि

वा·रा· सेनसर्वशः॥ पितापितामहोभ्राताज्ञातयोगोत्रजाग्रजाः॥ उपायनेधिकारिस्यान्पूर्वाभावेपरःपरः॥ पित्रैवोपनयेत्पुत्रंतदभावेपितुः
१२७ पिता॥ तदभावेपितुर्भ्रातातदभावेतुसोदरः॥ मध्येशिरसिचूडास्यात्वशिष्ठानांतुदक्षिणे॥ उभयोःपार्श्वयोरत्रिःकाश्यपानांशिखा
मता॥ शिशोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत्॥ पंचमाद्वादथोर्द्ध्वंतुगर्भिण्यामपिकारयेत्॥ सहोपनीयाकुर्याच्चेत्तदादो
षोनविद्यते॥ रसंध्यागर्जितेकालेनवृष्ट्यानचूषिते॥ ब्रह्मौदनंपचेदग्नौपक्वंचेत्तन्निवर्त्तते॥ तंवोधियजपेन्मंत्रंलक्षंचैत्रशिवालये·
ब्रह्मचारीस्वधर्मञ्चन्यूनंचेत्पूर्णमेवतत्॥ अनाश्रमीनतिष्ठेत्तदिनमेकमपिद्विजः॥ आश्रमेणविनातिष्ठन्प्रायश्चित्तीयतेहिसः॥ गु
रवेतुवरंदत्वास्नायीतदनुराज्ञया॥ वेदव्रतानिवापारंनीत्वाह्युभयमेववा॥ अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत्॥ अनन्यपूर्वि
कांतामसपिंडांयवीयसीं॥ पंचमात्सप्तमादूर्द्ध्वंमातृतःपितृतस्तथा॥ वधावरस्यवानातःकूटस्थाद्दिसप्तमः॥ पंचमीचेत्तयोर्माता
सापिंड्यंविनिवर्त्तते॥ कूटस्थोमूलपुरुषःयतःसंतानभेदजः॥ कुलंशीलंचवयश्चरूपंविद्यावित्तंचसनाथतांच॥ एतान्गुणान्स
प्तपरीक्ष्यदेयाकन्याबुधैःशेषमचिंतनीयं॥ कुलेक्रमनुत्रयीदर्वाङ्मुंडनादपिमुंडनं॥ प्रवेशान्निर्गमंनैवचनकुर्यान्मुंडनत्रयं॥ कुलेक्रमनु
त्रयादर्वाङ्मुंडनात्तुमुंडनं॥ पुत्रोद्वाहात्रैवपुत्रीविवाहोपिऋतुत्रये॥ अब्दांतरान्मुंडनंचनैकदामुंडनद्वयं॥ फाल्गुनेचैत्रमासेतुपुत्रो
द्वाहोपनयने॥ भेद्वाद्वत्सरकुर्वतिऋतुत्रयविलंबनं॥ जन्मार्क्षेजन्मदिवसेशुभाशुभंत्यजेद्बुधः॥ ज्येष्ठमासस्यद्यगर्भशुभवर्जेत्त्रि रामः
याश्वपि॥ एककालमृजयोरेकवत्सरेपुत्रकन्ययोः॥ एकक्रियानकर्त्तव्याक्रियाभेदेविधीयते॥ स्वसृयुगेभ्रातृयुगेस्वसृभ्रातृयुगेत १२७
था॥ एकस्मिन्मंडपेचैवनकुर्यान्मुंडनद्वयं॥ पुत्रीपरिणयात्पूर्वंयावद्दिनचतुष्टयं॥ पुत्र्यंतरस्यकुर्वंतिनोद्वाहमितिसूरयः॥ एकोद

3

घाः स्वस्थानप्रतिवासिन॥ शांतिरक्षंतु मे सर्वे ग्रहा गृह्णंतु मे बलिं॥ कृष्णोनंतोच्युतश्चक्री वैकुंठोथ जनार्दनः॥ उपेंद्रो यज्ञपुरुषो वासुदे
वस्तथा हरिः॥ योगीशः पुंडरीकाक्षो मासेनामान्यनुक्रमात्॥ इंद्राकायोर्दिगीशानां दिशं पंच वरुणस्य च॥ निक्षेयाथ भिमं दक्षिनेत्वा रक्ष
तु सर्वदा॥ अप्रमत्तं प्रमत्तं वा दिवा रात्रावथापि वा॥ रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥ रक्षै गांवसुधे देवि सदा सर्वगतं शुभे॥ आयुः
प्रमाणां निधिने निःक्षिप स्वहरिप्रिये॥ अविरादायुषं तस्य ये केचित् परिपंथिनः॥ जीवनारोग्यवित्तेषु निर्दह स्वाहिरे शालानः॥ धारिराप
द्रोष भूतानां मातस्त्वमधिका घलि॥ कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतां॥ सर्वैश्च जन्मादिवसे स्नात्वा मंगलवारिभिः॥ गुरुदेवाग्निवि
प्राश्च पूजनीया प्रयत्नतः॥ स्वनक्षत्रं च पितरस्तथा देवप्रजापति॥ प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महोत्सव॥ मार्कंडेया नमस्तेस्तु सप्त
कल्पांतजीवन॥ आयुरारोग्यसिद्ध्यर्थं प्रसीद भगवन्मुने॥ चिरंजीवि यथा त्वं तु मुनीनां प्रवर द्विज॥ कुरुष्व मुनिशार्दूल तथा मां चिरजी
विनं॥ मार्कंडेय महाभाग सप्तकल्पांतजीवन॥ आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव॥ सतिलं गुडसंमिश्रमंजल्यर्धमितं पयः
मार्कंडेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये॥ अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः॥ कृपः परशुरामश्च सप्तैते चिरजीविनः॥ स
प्तैतान्स्मरेन्नित्यं मार्कंडेयमथाष्टकं॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः॥ आरभ्याधानमा चौलात्कालेतीतेतु कर्मणां॥ व्याहृ
त्या तु समस्तं तु कृत्वा कर्म यथाक्रमं॥ एतेष्वेकैकलोपेपि पादकृच्छ्रं समाचरेत्॥ चूडायामर्धकृच्छ्रं स्यादापदित्येवमीरितं॥ अनापरि
सर्वत्र द्विगुणं द्विगुणं चरेत्॥ जातकर्मादिसंस्काराः स्वकाले न भवंति चेत॥ चौलादर्वाक् कुर्वीत प्रायश्चित्तादनंतरं॥ --- यश्चित्रकृते
पश्चात् सीतमकर्वै॥ कार्यमित्येकत्र्या चार्या नत्वन्येनुविपश्चितः॥ माघादिपंचमासेषु मेखलाबंधनं शिशो॥ ज्येष्ठमासेन ज्येष्ठस्य जन्ममा

वा.रा.
१२५

इदानीं नवपुत्राय दत्वा हस्तेहे नकल्पतां॥ निःसपानेन गृहे जीर्णे प्राशनी नैष्ठुसप्रसुः॥ वधूप्रवेशमांगल्येन मोंढे गुरुशुक्रयोः॥ बाती
याते च संक्रांतौ ग्रहणे रोगे वैधृतावपि॥ श्राद्धं विनाशुभं नैव प्राप्तकालेपि नानव॥ अमासंक्रांतिविष्ट्यादौ प्राप्तकालेपि नाच
रेत॥ दाने विवाहे यज्ञे च संग्रामे देशविप्लवे॥ आपद्यपि च कष्टायां सद्यः शौचं विधीयते॥ विवाहोत्सवयज्ञेषु त्वंतरामृत
सूतके॥ पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः॥ विवाहोत्सवयज्ञेषु त्वंतरामृतसूतके॥ परैरन्नं प्रदातव्यं भोक्तव्यं
च द्विजोत्तमः॥ व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतके॥ प्रारंभो वरणं यज्ञे संकल्पो व्र
तसत्रयोः॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया॥ अनालब्धविभूत्यर्थं कूष्मांडैर्जुहुयाद्घृतं॥ गां दद्यात्पंचगव्याशी तत अ
घतिसूतकी॥ ममप्रीतिकरा येयं मया सृष्टा पुरातनी॥ स्वर्कजातु सरणा सृष्टा अस्माकं प्रतिरक्षतु॥ नमस्ते मंगले देवि नमः सवित
रात्मजे॥ त्राहि मां कृपया देवि पत्नी त्वं मे इहागता॥ स्वर्कं तं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च॥ वृक्षाणामादिभूतस्त्वं देवानां प्री
तिवर्धनं॥ तृतीयो ब्राह्मणं पापं मृत्युं चापि विनाशय॥ पश्चात्तैलं न स्तैः केशैः कीटैर्वा मध्यसे विभिः॥ वसा सकृत्कुंकुमग्राह्यिष्वत्रावि अ
दृष्टकैः॥ ते बाधैरपि वीभत्सै दुष्टानिस्सु हंवीषितु॥ भिन्नानि चैव सर्वाणि दुष्टानि स्युः क्षिपेज्जले॥ शुक्ले च डिंडिम्ने न नजन्या माहत्य
गुरुयाजुष्णिः॥ वनस्पत्यानि भिन्नानि प्रागं डास्पनले क्षिपेत्॥ ॥ इति श्रीवाराहितंत्रे दक्षिणाम्नाय निर्वाणपदे द्वात्रिंशः पटलः॥ रामः
३२॥ भैरव उवाच॥ कालतत्त्वं कलायुक्तो संभूतः नाथेन भाषितं॥ जेनव्य स्यासमने पूर्वं ह्यायने मृत्युरोगिणी॥ कालस्य त्यनिभूतानिका १२५
न संहरते प्रजा॥ कालः स्वप्नोपि जागर्ति कालो हि दुरतिक्रमः॥ कालेदेवा विनश्यंति काले वा असुरपन्नगाः॥ नरेंद्रा सर्वजीवानां सर्वका

४

रघुसूनानामेकस्मिन्वासरे पुनः। विवाहं नैव कुर्वंति मंडपोपरि मंडने। पितादद्यात्स्वयं कन्यां भ्राता वा मत्तेनेपि च। मातामही मातृ
लश्च सकुल्यो वा धवलस्तथा। मातास्वभावे सर्वेषां प्रकृतो यदि वर्त्तते। तस्मात्प्रकृतिस्थायां कन्यां दद्युः स्वजातयः। ब्राह्मो दैवस्त
थार्षः प्राजापत्यस्तथासुरः। गांधर्वो राक्षसश्चैव पैशाचराक्षसश्च यः। यज्ञसाधनभूताया विश्वस्य प्रकाशिनी। विश्वरू
पधरो देवः प्रीयतामनया गवा। सर्वेशस्याभया भूमीवराहेण समुद्धृता। अनंतफलदानां तस्मात्तः शांतिं प्रयच्छ मे। इयं दासी
मयातुभ्यं श्रीवत्सप्रतिपादिता। सदाकर्मकरी योग्या पयेष्टं भइ मलुते। अभयं त्वं शायनी नित्यं मनूनां प्रियमुत्तमं। सौभा
ग्यं देहि मे नित्यं शय्यादानेन केशव। हिरण्यगर्भसंभूतं सौवर्णं चांगुलीयकं। सर्वप्रदं प्रयच्छामि प्रीयतां कमलापति। श्री
रोदमथने पूर्वसमुद्भूतं कुंडलद्वयं। श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति। इदं दंष्ट्राग्रहं त्वं सर्वोपस्करसंयुतं। तव
